# *READING AND WRITING SKILLS IN SANSKRIT*

**(SKT4 C13)**

**IV SEMESTER**

**Core Course**

**M.A. SANSKRIT GENERAL/SAHITYA**

**UNIVERSITY OF CALICUT,**
**School of Distance Education,**
**Calicut University P.O.,**
**Malappuram - 673 635, Kerala.**

**190215/190265**

# University of Calicut

## School of Distance Education,

## Study Material

## IV SEMESTER

## Core Course

## M.A. SANSKRIT GENERAL/ SAHITYA

# *READING AND WRITING SKILLS IN SANSKRIT*

**Prepared By:**
***Dr. Sooraj R.S,***
*Guest Faculty, Dept. of Sanskrit Sahitya,*
*Sree Sankaracharya University of Sanskrit Regional Campus Ettumanoor, Kottayam.*

**Scrutinized By:**
***Dr. Indira. K,***
*Assistant Professor in Sanskrit,*
*School of Distance Education,*
*University of Calicut.*

***DISCLAIMER***
"The author shall be solely responsible for the content and views expressed in this book"

# CONTENTS

**Unit I** Comprehension

The knowledge of parsing a text, doing padaccheda, writing anvaya, knowing the exact meaning of samāsa, and the skill in getting the purport of a text is to be assessed. The mode of doing the same shall be by

i) asking to give padccheda of a given verse,

ii) directing to write anvaya and

iii) asking to answer simple questions on given prose passage.

**Unit II** Writing skills

Writing skills of the students are to be assessed. Two modes can be used for this: i) asking to develop a given outline into a full story, and ii) asking to write an essay on given general topic.

**Unit III** Sentence construction

Student’s skill in constructing a grammatically correct sentence is to be developed and assessed. For this the students may be asked to translate given short and simple sentences into Sanskrit. Care should be taken to see that only short (having four or five words) and simple sentences are asked.

# Unit I

# Comprehension

The knowledge of parsing a text, doing padaccheda, writing anvaya, knowing the exact meaning of samāsa, and the skill in getting the purport of a text is to be assessed. The mode of doing the same shall be by

i) asking to give padccheda of a given verse,

ii) directing to write anvaya and

iii) asking to answer simple questions on given prose passage.

Parsing a text from selected Verses of Srīrāmodanta

**1.**

**पुरा विश्रवसः पुत्रो रावणो नाम राक्षसः ।**

**आसीदस्यानुजौ चास्तां कुम्भकर्णविभीषणौ ॥ २॥**

**अन्वयः**

पुरा विश्रवसः पुत्रः रावणः नाम राक्षसः आसीत् । अस्य अनुजौ कुम्भकर्णविभीषणौ च आस्ताम् ।

**पदच्छेदः**

आसीत् + अस्य +अनुजौ = आसीदस्यानुजौ

च + आस्ताम् = चास्ताम्

**विग्रहः**

कुम्भकर्णः च विभीषणः च कुम्भकर्णविभीषणौ

**2.**

**ते तु तीव्रेण तपसा प्रत्यक्षीकृत्य वेधसम् ।**

**वव्रिरे च वरानिष्टानस्मादाश्रितवत्सलात् ।।३।।**

**अन्वयः**

ते तु तीव्रेण तपसा वेधसं प्रत्यक्षीकृत्य, आश्रितवत्सलात् अस्मात् इष्टान् वरान् वव्रिरे च ।

**पदच्छेदः**

वरान् + इष्टान् + अस्मात् + आश्रितवत्सलात् = वरानिष्टानस्मादाश्रितवत्सलात्

**3.**

**विभीषणो विष्णुभक्तिं वव्रे सत्त्वगुणान्वितः ।**

**तेभ्य एतान्वरान्दत्त्वा तत्रैवान्तर्दधे प्रभुः ।। ५।।**

**अन्वयः**

सत्वगुणान्वितः विभीषणः विष्णुभक्तिं वव्रे, प्रभुः तेभ्य एतान् वरान् दत्वा तत्र एव अन्तर्दधे।

**पदच्छेदः**

तत्र + एव + अन्तर्दधे = तत्रैवान्तर्दधे।

**विग्रहः**

सत्वगुणैः अन्वितः सत्वगुणान्वितः

**4.**

**ततो दशाननात्पीडामजस्तस्मै न्यवेदयत्।**

**तच्छ्रुत्वोवाच धातारं हर्षयन्विष्टरश्रवाः॥ १५॥**

**अन्वयः**

ततः अजः दशाननात् पीडां तस्मै न्यवेदयत्, विष्टरश्रवाः तत् श्रुत्वा धातारं हर्षयन् उवाच।

**पदच्छेदः**

तत् + श्रुत्वा = तच्छ्रुत्वा

अजः + तस्मै = अजस्तस्मै

**5.**

**आत्मांशैश्च सुराः सर्वे भूमौ वानररूपिणः ।**

**जायेरन्मम साहाय्यं कर्तुं रावणनिग्रहे ॥ १७॥**

**अन्वयः**

सर्वे सुराः च रावणनिग्रहे मम साहाय्यं कर्तुं भूमौ आत्मांशैः वानररूपिणः जायेरन् ।

**पदच्छेदः**

आत्मांशैः + च = आत्मांशैश्च

**6.**

**एवमुक्त्वा विधातारं तत्रैवान्तर्दधे प्रभुः ।**

**पद्मयोनिस्तु गीर्वाणैः समं प्रायात्प्रहृष्टधीः ॥ १८॥**

**अन्वयः**

प्रभुः एवं विधातारं उक्त्वा तत्र एव अन्तर्दधे, पद्मयोनिः तु प्रहृष्टधी सन् देवगणैः समं प्रायात् ।

**पदच्छेदः**

एवं + उक्त्वा = एवमुक्त्वा ।

तत्र + एव + अन्तर्दधे = तत्रैवान्तर्दधे

पद्मयोनिः + तु = पद्मयोनिस्तु

**7.**

**पुरैव जनयामास जाम्बवन्तं च पद्मजः ।**

**एवमन्ये च विबुधाः कपीनजनयन्बहून् ॥२०॥**

**अन्वयः**

पद्मजः च पुरा एव जाम्बवन्तं जनयामास. एवं अन्ये विबुधाः च बहून् कपीन् अजनयन् ।

**पदच्छेदः**

पुरा + एव = पुरैव

कपीन् + अजनयन् = कपीनजनयन्

**विग्रहः**

पद्मात् जायते इति पद्मजः

**8.**

**ततः सुमन्त्रवचनादृष्यशृङ्गं स भूपतिः ।**

**आनीय पुत्रकामेष्टिमारेभे सपुरोहितः ॥ २३॥**

**अन्वयः**

ततः सः भूपतिः सुमन्त्रवचनात् ऋश्यशृङ्गं आनीय सपुरोहितः पुत्रकामेष्टीम् आरभे ।

**पदच्छेदः**

सुमन्त्रवचनात् + ऋश्यशृङ्गं = सुमन्त्रवचनादृष्यशृङ्गं

**विग्रहः**

दशसु दिक्षुः अप्रतिहतथः यस्य स दशरथः

सुमन्त्रस्य वचनं सुमन्त्रवचनं तस्मात् सुमन्त्रवचनात्

सहायस्य भावः साहाय्यम्

रावणस्य निग्रहः रावणनिग्रहः तस्मिन् रावणनिग्रहे

**9.**

**अथाग्नेरुत्थितः कश्चिद्गृहीत्वा पायसं चरुम् ।**

**एतत्प्राशय पत्नीस्त्वमित्युक्त्वाऽदान्नृपाय सः ॥ २४॥**

**अन्वयः**

अथ पायसं चरुं गृहीत्वा कश्चित् अग्नेः उत्थितः,सः त्वं एतत् पत्नीः प्राशय इति उक्त्वा नृपाय अदात् ।

**पदच्छेदः**

किञ्चित् + गृहीत्वा = कश्चिद्गृहीत्वा

अग्नेः + उत्थितः = अग्नेरुत्थितः

इति + उक्त्वा + अदात् + नृपाय = इत्युक्त्वाऽदान्नृपाय

**10.**

**राघवस्तु ततोऽस्त्रेण क्षिप्त्वा मारीचमर्णवे ।**

**सुबाहुप्रमुखान् हत्वा यज्ञं चापालयन्मुनेः ॥ ३४॥**

**अन्वयः**

ततः राघवः तु अस्त्रेण मारीचं अर्णवे क्षीप्त्वा सुबाहुप्रमुखान् हत्वा मुनेः यज्ञं अपालयत् च ।

**पदच्छेदः**

ततः + अस्त्रेण = ततोऽस्त्रेण

मारीचं + अर्णवे = मारीचमर्णवे

च + अपालयत् + मुनेः = चापालयमुनेः

**विग्रहः**

सुबाहुः प्रमुखः येषां ते सुबाहुप्रमुखाः तान् सुबाहुप्रमुखान्

# Parsing a text of few verses

**1.**

**अथोत्थितानन्दनिमीलिताक्ष्यः**

**विलूनदूर्वाकुरलाञ्छितास्याः।**

**गावस्तदभ्याशमुपेत्य तस्थुः**

**निस्पन्ददेहाः निभृतैः श्रवोभिः॥**

**अन्वयः**

अथ गावः उत्थितानन्दनिमीलिताक्ष्यः विलूनदूर्वाङ्कुरलाञ्छितास्याः तदभ्याशम् उपेत्य निस्पन्ददेहाः निभृतैः श्रवोभिः तस्थुः ।

**पदार्थः**

अथ- अनन्तरम् (वेणुगानश्रवणानन्तरम्)

गावः- धेनवः उत्थितानन्दनिमीलिताक्ष्यः - (वेणुगानश्रवणजन्येन) वर्धितेन आनन्देन मुकुलितनयनाः

विलूनर्वाङ्कुरलाञ्छितास्याः - विच्छिन्नैः दूर्वाङ्कुरैः अङ्कितमुखाः

तदभ्याशम्- तस्य (कृष्णस्य) समीपम्

उपेत्य- प्राप्य

निस्पन्ददेहाः- निश्चलदेहाः

निभृतैः- निश्चलैः

श्रवोभिः- कर्णैः

तस्थुः –अवतस्थिरे

**विग्रहः**

उत्थितेन आनन्देन निमीलितानि अक्षीणि यासां ताः - उत्थितानन्दनिमीलिताक्ष्यः।

विलूनैःदूर्वाङ्कुरै : लाञ्छितानि आस्यानि यासां, ताः विलूनर्वाङ्कुरलाञ्छितास्याः ।

**आशयः**

कृष्णस्य वेणुगानं श्रुत्वा धेनूनां नेत्राणि आनन्देन निमीलितानि अभवन् । शतपर्विकाणां विच्छिन्नानि अङ्कुराणि तासां मुखेषु एव अवस्थितानि । ताः तं नादं सश्रद्धम् अशृण्वन् ।

**2.**

**तस्मिन् मनोहारिणि चक्रपाणेः**

**वनान्तरे मूर्च्छति वंशनादे।**

**विधीयमानं परिहृत्य कर्म**

**सर्वेऽपि सत्वा लिखिता इवासन।।**

**अन्वयः**

चक्रपाणेः मनोहारिणि वंशनादेतस्मिन् वनान्तरे मूर्च्छति (सति) सर्वे सत्वाः अपि विधीयमानं कर्म परिहृत्य लिखिताः इव आसन्।

**पदार्थः**

चक्रपाणेः - श्रीकृष्णस्य

मनोहारिणि–चित्ताह्लादिनि

वंशनादे–वेणुध्वनौ

वनान्तरे–काननान्तर्भागे

मूर्च्छति - व्याप्नुवति (सति)

सर्वे अपि सत्वाः - सकलाः प्राणिनः अपि

विधीयमानं कर्म - क्रियमाणं कर्म

परित्यज्य चित्रेआलिखिताः इव अभवन्।

**विग्रहः**

चक्रं पाणौ यस्य सः चक्रपाणिःतस्य – चक्रपाणेः।

**आशयः**

कृष्णस्य वेणुनादः वने सर्वेषामपि हृदयम् आकर्षति स्म। सः नादःसवत्र व्याप्तो बभूव। तदा सर्वे जन्तवः स्वस्वकर्माणि परित्यज्य लिखिता इव तस्थुः ।

**3.**

**उपाविशन्नुज्झितचापलानि**

**स्वजानुविन्यस्तकराननानि।**

**निस्पन्ददृष्टीनि वनद्रुमाणां**

**शाखासु शाखामृगमण्डलानि॥**

**अन्वयः**

शाखामृगमण्डलानि वनद्रुमाणांशाखासु उज्झितचापलानि स्वजानुविन्यस्तकराननानिनिस्पन्ददृष्टीनि उपाविशन्।

**पदार्थः**

शाखामृगमण्डलानि - वानरसमूहाः

वनद्रुमाणाम्- वनवृक्षाणाम्

शाखासु - विटपेषु

उज्झितचापलानि - परित्यक्तचपलकर्माणि

स्वजानुविन्यस्तकराननानि - स्वस्वोरुपर्वसु स्थापितकराननानि

निस्पन्ददृष्टीनि - निश्चलनेत्रयुक्तानि

उपाविशन् - उपविशन्ति स्म।

**आशयः**

वेणुनादे प्रसूते जन्मना चपलाः मर्कटाः अपि स्वस्वचापल्यं परित्यज्यमुखानि करांश्च जानुषु विन्यस्य निर्निमेषम् उपाविशन्।

**विग्रहः**

उज्जितं चापलं यैः तानि - उज्झितचापलानि।

करौ च आननं च एषां समाहारः – कराननम्।

स्वेषु जानुषु विन्यस्तं कराननं यैः तानि स्वजानुविन्यस्तकराननानि।

शाखामृगाणां मण्डलानि - शाखामृगमण्डलानि।

वनेषु द्रुमाः, तेषां – वनद्रुमाणाम्।

## 4.

## पद्भ्यामवष्टभ्य महीमुभाभ्याम्

**सद्यः समुत्तम्भितपूर्वकायः।**

**सिंहः करीन्द्राक्रमणे प्रवृत्तः**

**तस्थौ तथा कृत्रिमसिंहकल्पः।।**

**अन्वयः**

उभाभ्यां पद्भ्यां महीम् अवष्टभ्य सद्यः समुत्तम्भितपूर्वकायः करीन्द्राक्रमणेप्रवृत्तः सिंहः तथा कृत्रिमसिंहकल्पः तस्थौ।

**पदार्थः**

उभाभ्याम्- द्वाभ्याम्

पद्भ्याम् - चरणाभ्याम्

महीम्- भूमिम्

अवष्टभ्य- अवलम्ब्य

सद्यः- तत्क्षणे

समुत्तम्भितपूर्वकायः - शरीरस्य पूर्वभागं सम्यक् उन्नमय्य स्थितः सन्

करीन्द्राक्रमणे प्रवृत्तः - गजश्रेष्ठम् आक्रमितुम् उद्युक्तः

मृगेन्द्र - सिंह

तथा - तदवस्थायाम् एव

कृत्रिमसिंहकल्पः - कृतकसिंहतुल्यः

तस्थौ - अतिष्ठत् ।

**विग्रहः**

पूर्व कायस्य - पूर्वकायः।

समुत्तम्भितः पूर्वकायः येन सः समुत्तम्भितपूर्वकायः।

**आशयः**

करीन्द्रम् आक्रमितुं पूर्वकायम् उन्नमय्य चरणद्वयं भूमौ अवस्थाप्य स्थितःसिंहः वेणुनादश्रवणे मग्नः चित्रार्पित इव निश्चलः अतिष्ठत् ।

**5.**

**तद्वंशनालाच्च्युतमच्युतस्य**

**गेयामृतं साधु निषेव्य वृक्षाः।**

**चिरं जराजर्जरितत्वचोऽपि**

**बाला इवासन नवपल्लवाढ्याः॥**

**अन्वयः**

वृक्षाः - तरवः

चिरं - चिरकालादारभ्य

जराजर्जरितत्वचःअपि - - जरया (वार्धक्येन) शुष्कविदलितचर्मयुक्ताः अपि

**पदच्छेदः**

अच्युतस्य –श्रीकष्णस्य

वंशनालात् – वेणोः

च्युतं – गलितम्

तत् गेयामृतं - तद् गानामृतम्

निषेव्य–आस्वाद्य

नवपल्लवाढ्याः - नूतनकिसलयसम्पन्नाः

बालाः इव - बालवृक्षाः इव

आसन् - अभवन्

**विग्रहः**

जरया जर्जरिता त्वक् येषां ते जराजर्जरितत्वचः ।

नवैः पल्लवैः आढ्याः - नवपल्लवाढ्याः ।

**आशयः**

कालगत्या शुष्काः वृक्षाः वेणुनादश्रवणमात्रे एव पुनरपि पल्लविताःबभूवः। यतो हि ते गानामृतं पीतवन्तः। (अमृतोपभोगेन सत्वाना वृद्धावस्था नश्यति, युवत्वं जायते इति भावः।)

## Write anvaya for given verses

1. तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः ।

हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा।।

2. सीता समुत्थाप्य जगाद वाक्यं प्रीतास्मि ते स्ॐयचिराय जीव।

विडौजसा विष्णुरिवाग्रजेन भ्रात्रा यदित्थं परवानसि त्वं।।

3. उपस्थितां पूर्वं अपास्य लक्ष्मीं वनं मया सार्धं असि प्रपन्नः।
तदास्पदं प्राप्य तयातिरोषात्सोढास्मि न त्वद्भवने वसन्ती।।

4. तां अभ्यगच्छद्रुदितानुसारी कविः कुशेध्माहरणाय यातः।

निषादविद्धाण्डजदर्शनोत्थः श्लोकत्वं आपद्यत यस्य शोकः।।

5. मनीषिताः सन्ति गृहेषु दैवतास्तपः क्व वत्से क्व च तावकं वपुः।

पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्त्रिणः॥

6. स माधवेनाभिमतेन सख्या रत्या च साशङ्कमनुप्रयातः।

अङ्गव्ययप्रार्थितकार्यसिद्धिः स्थाण्वाश्रमं हैमवतं जगाम॥

7. यदस्य यात्रासु बलोद्धतं रजः स्फुरत्प्रतापानलधूममञ्जिम।

तदेव गत्वा पतितं सुधाम्बुधौ दधाति पङ्कीभवदङ्कतां विधौ॥

8. नवानधोऽधो बृहतः पयोधरान् समूढकर्पूरपरागपाण्डुरम्।

क्षणं क्षणोत्क्षिप्तगजेन्द्रकृत्तिना स्फुटोपमं भूतिसितेन शंभुना॥

9. यस्या पतित्वे विहिताभिलाषः करोति तीव्राणि तपांसि लोकः।

बिभर्ति रत्नाकरमेखलां तामङ्केन पुत्रीमिव यो धरित्रीम्॥

10. छन्नेषु यस्मिन् कनकोज्ज्वलाभिरामूलचूडं नवमञ्जरीभिः ।

गन्धेन विज्ञाय पतन्ति भृङ्गाः शृङ्गान्तरारग्वधपादपेषु ॥

## Short Stories with questions

### 1.

एकस्मिन् उपवने स्थिता: आम्रवृक्षाः परस्परं वार्तालापं कुर्वन्तः आसन् यत् “मनुष्याः तेषां पक्वानि फलानि त्रोटयित्वा नयन्ति, परन्तु कृतज्ञतायाः एकम् अपि शब्दं तान् प्रति नैव कथयन्ति। अहो ! तेषाम् इमां कृतघ्नतां धिक् धिक्!" वृक्षाणां समीपतः निःसरन् कश्चित् पथिकः तेषाम् इमां वार्तां श्रुतवान्, किञ्चित् तत्र स्थित्वा च तान् अब्रवीत्- "अस्मिन् भवद्भ्यः कृतज्ञतायाः प्रकाशनस्य का वार्ता? भवतां स्वभावः फलोत्पादनम्। तद् भवद्भिः क्रियते, करिष्यते अपि च एव । इयं भवदीया विवशता। पुनः विवशतायाः लाभं क: न गृह्णाति?" इति कथयित्वा सः अग्रे प्रस्थितः इति ।

**प्रश्नाः**

1. आम्र-वृक्षाः परस्परं कं वार्तालापं कुर्वन्ति स्म?

2. तं वार्तालापं कः श्रुतवान् ?किं च सः आम्र-वृक्षान् अकथयत् ?

3. आम्रवृक्षाणां स्वभावः कीदृशः अस्ति? तेषां विवशता का?

4. साधुः किं न करोति? तस्य विवशता का?

5. साधोः विवशतया तेन सह जनाः कीदृशं व्यवहारं कुर्वन्ति?

### 2.

मम नगरान्तरे गमनम् अभूत्। तत्र मया भाषणं देयम् आसीत्। सामग्री-सङ्कलनार्थं मम तदा गीता-रामायण-महाभारतादि-ग्रन्थानाम् आवश्यकता

आपतिता। अहं यस्य अतिथि: आसं, स सनातनधर्म-सभायाः कर्मठः सदस्यः अवर्तत। अहं स्वीयाम् आवश्यकता तस्य सम्मुखे उपस्थापितवान् । मम अतीव आश्चर्यम् आसीत्, तस्य संस्कृत-ज्ञानं तु दूरे तिष्ठतु, इमे ग्रन्थाः तस्य गृहे न आसन्। अहम् आत्मीयां वेदनां स्वकीये भाषणे व्यक्तां कृतवान् यत् "सः कीदृशः सनातन-धर्मावलम्बी हिन्दुः, यस्य गृहे परमपावनाः गीता-रामायण-महाभारतादि-ग्रन्थाः अपि न मिलन्ति! यः सन्ध्योपासनां न करोति, यः गायत्रीमन्त्रं नित्यं न जपति–किं सः अपि हिन्दुः? हन्त! असंस्कृतज्ञाः अपि ब्राह्मणाः स्वनाम्ना सह पण्डितः, चतुर्वेदी, त्रिवेदी, त्रिपाठी, अग्निहोत्री, शास्त्री, आचार्यः इत्यादि योजयित्वा किं शिष्ट-जनोचितं कर्म कुर्वन्ति?" इति।

**प्रश्नाः**

1. अहं यस्य अतिथि: आसं सः कः आसीत्?

2. अहं कां स्वीयाम् आवश्यकतां तस्य सम्मुखे उपस्थापितवान् ?

3. अहं स्वकीये भाषणे कीदृशीम् आत्मवेदना व्यक्तां कृतवान् ?

4. यद्-गृहे गीता-रामायणादयः न मिलन्ति, सः किं न भवति?

5. इयं कथा का प्रेरणां ददाति?

# Unit II

# Writing skills

Writing skills of the students are to be assessed. Two modes can be used for this: i) asking to develop a given outline into a full story, and ii) asking to write an essay on given general topic.

## 1. सिंह-शशक-कथा

यस्य बुद्धिर्बलं तस्य निर्बुद्धेस्तु कुतो बलम्? ।

वने सिंहो मदोन्मत्तः शशकेन निपातितः ॥

कस्मिंश्चिद्वने भासुरको नाम सिंहः प्रतिवसति स्म । अथासौ वीर्यातिरेकान्नित्यमेवानेकान् मृगशशकादीन् व्यापादयन्नोपरराम । अथान्वेद्यस्तद्वनजाः सर्वे सारङ्गवराहमहिषशशकादयो मिलित्वा तमभ्युपेत्य प्रोचुः -- स्वामिन् किमनेन सकलमृगवधेन नित्यमेव, यतस्तवैकेनापि मृगेण तृप्तिर्भवति, तक्रियतामस्माभिः सह समयधर्मः । अध्यप्रभृति तवात्रोपविष्टस्य जातिक्रमेण प्रतिदिनमेको मृगो भक्षणार्थं समेप्यति । एवं कृते तव तावत्प्राणयात्रा क्लेशं विनापि भविष्यति, अस्माकं च पुनः सर्वोच्छेदनं न स्यात् । तदेष राजधर्मोSनुष्ठीयताम् ।

अथ तेषां तद्वचनमाकर्ण्य भासुरक आह -- "अहो सत्यमभिहितम भवाद्भिः । करं यदि ममोपविष्टस्यात्र नित्यमेव नैकेको मृगः समागमिष्यति तन्नूनं सर्वानपि भक्षयिष्यामि" ।अथ ते तथेति प्रतिज्ञाय निवृतिभाजस्त्रव वने निर्भयाः पर्यटन्ति । एकश्च प्रतिदिनं जातिक्रमेण वृद्धो वा, वैराग्ययुक्तो वा, शोकग्रस्तो वा, पुत्रकलत्रनाशभीतो वा तेषां नध्यात्तस्य भोजनार्थं मध्याह्नसमये उपतिष्ठति ।

अथ कदाचिज्जातिक्रमाच्छशकस्यावसरः समायातः । स समस्तमृगप्रेरितोऽनिच्छन्नपि मन्दं मन्दं गत्वा तस्य वधोपायं चिन्तयन् वेलातिक्रमं कृत्वा व्याकुलितहृदयो यावद्गच्छति तावन्मार्गे गच्छता कूपः संदृष्टः । यावत्कूपोपरि याति तावत्कूपमध्ये आत्मनः प्रतिबिम्बं ददर्श । दृष्ट्वा च तेन हृदयेन चिन्तितम् यद् -- भव्य उपायोऽस्ति । अहं भासुरकं प्रकोप्य स्वबुद्ध्याऽस्मिन्कूपे पातयिष्यामि ।

अथासौ दिनशेषे भासुरकसमीपं प्राप्तः । सिंहोऽपि वेलातिक्रमेण क्षुत्क्षामकण्ठः ।कोपाविष्टः सक्कणी परिलिहन्नचिन्तयत् -- अहो प्रातराहाराय निःसत्त्वं वनं मया कर्तव्यम् । एवं चिन्तयतस्तस्य शशको मन्दं मन्दं गत्वा प्रणम्य तस्याऽग्रे स्थितः ।अथ तं लतात्मा भासुरको भर्त्यन्नाह -- "रे शशकाधम ! एकस्तावत्त्व लघुः प्राप्तः अपरतो वेलातिक्रमेण । तदस्मादपराधात् त्वां निपात्य, प्रातः सकलान्यपि मृगकुलान्युच्छेदयिष्यामि ।"

अथ शशकः सविनयं प्रोवाच --" स्वामिन् ! नापराधो मम, न चान्यमृगाणाम् । तच्छ्रूयतां कारणम् ।"सिंह आह -- "सत्वरं निवेदय, यावन्मम् दंष्टान्तर्गतो न भवान्भवति" इति ।शशक आह -- "स्वामिन् समस्तमृगैरद्य जातिक्रमेण मम लघुतरस्य प्रस्तावं विज्ञाय, ततोऽहं पञ्चशशकैः समं प्रेषितः । ततमाश्चाहमागच्छन्नन्तराले महता केनचिदपरेण सिंहेन क्षितिविवरान्निर्गत्याभिहितः --" रे ! कः प्रस्थिता यूयम् अभीष्टदेवतां स्मरत ।ततो मयाभिहितम् -- "वयं स्वामिनो भासुरकसिंहस्य सकाशमाहारार्थ समयधर्मेण गच्छामः " ।ततस्तेनाभिहितम् -- "यद्येवं तर्विं मदीयमेतद्वनम् । मया सह समयधर्मेण समस्तैरपि श्वापदैर्वर्तितव्यम् । चौररूपी स भासुरकः । अथ यदि सोऽत्र राजा ततो विश्वासस्थाने चतुरः शशकानत्र धृत्वा तमाहूय द्रुततरमागच्, येन यः कश्चिदावयोर्मध्यापराक्रमेण राजा भविष्यति" इति ।

ततोऽहं तेनादिष्टः स्वामिसकाशमभयागतः । ऐतद्वलाव्यतिक्रमकारणम् । तदत्र स्वामी प्रमाणम् ।तच्छ्रुत्वा भासुरक आह - "भद्र! यद्येवं , तत्सत्वरं दर्शय मे तं चौरसिंहं, येनाहं मृगकोपं तस्योपरि क्षिप्त्वा स्वस्थो भवामि ।" उक्तञ्च

भूमिमित्रं हिरण्यम च विग्रहस्य फलत्रयम् ।

नास्त्येकमपि यद्येषां न त कुर्यात्छञ्चन ॥

यत्र न स्यात्फलं भूरि यत्र न स्यात्पराभवः ।

म तत्र मतिमान्युद्धं समुत्पाद्य समाचरेत् ॥

शशक आह --" स्वामिन् सत्यमिदम् । सवभूमिहितोः परिभवाच्च युद्धयन्ते क्षत्क्षियाः । परं स दुर्गाश्रयः, दुर्गान्निष्क्रम्य वयंतेन विषकम्भिताः । तो दुर्गस्थो दुःसाध्यो भवति रिपुः ।"भासुरक आह -- "भोः ! किं तवानेन व्यापारेण ? दर्शय मे तं दुर्गस्थमपि ।"

शशक आह -- "यद्येवं तर्ह्यागिच्छतु स्वामी ।" एवमुक्त्वाऽग्रे व्यवस्थितः । ततश्च तेनाऽऽगच्छता यः कूपो दृष्टोऽभूत्तमेव कूपमासाद्य भासुरकमाह -- "स्वामिन् ! कस्ते प्रतापं सोढुं समर्थः । त्वां दृष्ट्वा दूरतोऽपि चौरसिंहः प्रविष्टः स्वं दुर्गम् । तदागच्छ, येन दर्शयामि" इति ।भासुरक आह -- "दर्शय मे दुर्गम्"

तदनु दशिस्तेन कूपः । ततः सोऽपि मूर्खः सिंहः कूपमध्ये आत्मप्रतिबिम्बं जलमध्यगतं दृष्ट्वा सिंहनादं मुमोच । ततः प्रतिशब्देन कूपमध्याद् द्विगुणतरो नादः समुत्थितः । अथ तेन शत्रुं मत्वातमानं तस्योपरि प्रक्षिप्य , प्राणाः परित्यक्ताः । शशकोऽपि हृष्टमनाः सर्वमृगानानन्द्य , तैः प्रशस्यमानो यथासुखं तत्र वने निवसति स्म ।

## 2. धर्मबुद्धि-पापबुद्धि कथा

धर्मबुद्धिः कुबुद्धिश्च द्वावेतौ विदितौ मम ।

पुत्रेण व्यर्थपाण्डित्यात् पिता धूमेन घातितः ॥

कस्मिंश्चिदधिष्ठाने धर्मबुद्धिः पापबुद्धिश्चेति द्वे मित्रे प्रतिवसतः स्म । अथ कदाचित्पापबुद्धिना चिन्तितम् -- "अहं तावन्मूर्खो दारिद्रयोपेतश्च । तदेनं धर्मबुद्धिमादाय देशान्तरं गत्वास्याश्रयेणार्थोपार्जनं कृत्वैनमपि वञ्चयित्वा सुखी भवामि ।"अथान्यस्मिन्नहनि पापबुद्धिधर्मबुद्धि प्राह -- "भो मित्र ! वार्द्धकमावे किं त्वमात्मविचेष्टितं स्मरिष्यसि ? देशान्तरमदृष्ट्वा कां शिशुजनस्य वार्तां कथयिष्यसि ? उक्तञ्च

देशान्तरेषु बहुविधभाषावेषादि येन न ज्ञातम् ।

भ्रमता धरणीपीठे तस्य फल जन्मनो व्यर्थम् ॥

तथा च

विद्यां वित्तं शिल्पं तावन्नाप्नोति मानवः सम्यक् ।

यावद् व्रजति न भूमौ देशद्देशान्तरं हृष्टः ॥

अथ तस्य तद्वचनमाकर्ण्य प्रहृष्टमनास्तेनैव सह गुरुजनानुज्ञातः शुभेऽनि देशान्तरं प्रस्थितः । तत्र च धर्मबुद्धिप्रभावेण भ्रमता पापबुद्धिना प्रभूततरं वित्तमासादिम् । ततश्च द्वावपि तौ प्रभूतोपार्जितद्रव्यौ प्रहृष्टौ स्वगृहं प्रत्यौत्सुक्येन निवृत्तौ । उक्तञ्च --

प्राप्तवाद्यार्थशिल्पानां देशान्तरनिवासिनाम् ।

क्रोशमात्रोऽपि भूभागः शतयोजनवद्भवेत् ॥

अथ स्वस्थानवर्तिना पापबुद्धिना धर्मबुद्धिरभिहितः -- "भद्र ! न सर्वमेतद्धनं गृहं प्रति नेतुं युज्यते , यतः कुटुम्बिनो बान्धवाश्च प्रार्थयिष्यन्ते । तदत्रैव वनगहने क्वापि भूमौ निक्षिप्य किञ्चिन्मात्रमादाय गृहं प्रविशावः । भूयोऽपि प्रयोजने सञ्जाते तन्मात्रं समेत्यास्मात्स्थानान्नेष्यावः । उक्तञ्च --

न वित्तं दर्शयेत्प्राज्ञः कस्यचित्स्वल्पमप्यहो! ।

मुनेरपि यतस्तस्य दर्शनाच्चलते मनः ॥

तथा च

यथामिषं जले मत्स्यैर्भक्ष्यते श्वापदैर्भुवि ।

आकाशे पक्षिभिश्चैव तथा सर्वत्र वित्तवान् ॥

तदाकर्ण्य धर्मबुद्धिराह -- "भद्र ! एवं क्रियताम् ।"

तथानुषठिते द्वावपि तौ स्वगृहं गत्वा सुखेन संस्थितवन्तौ । अथान्यस्मिन्नहनि पापबुद्धिर्निशीथेऽटव्यां गत्वा तत्सर्वं वित्तं समादाय गर्त्तं पूरयित्वा स्वभवनं जगाम । अथाऽन्येद्युर्धर्मबुद्धिं समभ्येत्य प्रोवाच -- " सखे ! बहुकुटुम्वा वयं वित्ताभावात्सीदामः । तद्गत्वा तत्र स्थाने किञ्चिन्मात्रं धनमानयावः ।"

सोऽब्रवीत् -- "भद्र ! एवं क्रियताम् ।"

अथ द्वावपि गत्वा तत्स्थानं यावत्खनतस्तावद्रिक्तं भाण्डं दृष्टवन्तौ । अत्रान्तरे पापबुद्धिः शिरस्ताडयन् प्रोवाच -- "भो धर्मबुद्धे ! त्वया हृतमेतद्धनं नान्येन, यतो भूयोऽपि गर्त्तापूरणं कृतम् । तत्प्रयच्छ मे तस्याधर्म् । अथवाहं राजकुले निवेदिष्यामि । स आह -- " भो दुरात्मन् ! मैवं वद, धर्मबुद्धिः खल्वहम् । नैतच्चौरकर्म करोमि । उक्तञ्च --

मातृवत्परदाराणि परद्रव्याणि लोष्टवत् ।

आत्मवत्सर्वभूतानि वीक्ष्यन्ते धर्मबुद्धयः ॥

एवं द्वावपि तौ विवदमानौ धर्माधिकरणं गतौ प्रोचतुश्च परस्परं दूषयनतौ ।अथ धर्माधिकरणाधिष्ठितपुरुषौर्दिव्यार्थे यावन्नियोजितौ, तावत्पापबुद्धिराह -- "अहो ! न सम्यग्दृष्टाऽयं न्यायः । उक्तञ्च

विवादेऽन्विष्यते पत्रं तदभावेऽपि साक्षिणः ।

शाक्ष्यभावात्ततो दिव्यं प्रवदन्ति मनीषिणः ॥

तदये विषये मम वृक्षदेवताः साक्षीभूतांस्तिष्ठन्ति । ता अप्यावयोरेकतरं चौरं साधुं वा कथयिष्यन्ति । अथ तैः सर्वैरभिहितम् -- " भोः ! युक्तमुक्त भवता । उक्तञ्च --

अन्त्यजोऽपि यदा साक्षी विवादे सम्प्रजायते ।

न तत्र विद्यते दिव्यं किं पुनर्यत्र देवता ॥

तदस्माकमप्यत्र विषये महत्कौतूहलं वर्तते । प्रत्यूषसमये युवाभ्यामप्यस्माभिः सह तत्र वनोद्देशे गन्तव्यम् " इति ।एतस्मिन्नन्तरे पापबुद्धि स्वगृहं गत्वा स्वजनकमुवाच -- " तात ! प्रभूतोऽयं मयार्थो धर्मबुद्धेश्चोरितः । स च त्व वचनेन परिणतिं गच्छति, अन्यथास्माकं प्राणैः सह यास्यति ।"स आह -- "वत्स ! द्रुतं वद , येन प्रोच्य तद् द्रव्यं स्थिरतां नयामि ।"

पापबुद्धिराह -- "तात ! अस्ति तत्प्रदेशे महाशमी ।तस्यां कोटरमस्ति । तत्र त्वं साम्प्रतमेव प्रविश । ततः प्रभाते यदाहं सत्यश्रावणं करोमि, तदा त्वया वाच्यं यद् धर्मबुद्वश्चौरः " इति ।तथानुष्ठिते प्रत्यूषे स्नात्वा पापबुद्धिः धर्मबुद्धिपुरःसरो धर्माधिकरणिकैः सह तां शमीमभ्येत्य तारस्वरेण प्रोवाच -- "आदित्यचन्द्रावनिलोऽनलश्च , द्यौर्भूमिरापो हृदयं यमश्च । अहश्च रात्रिश्च उभे च सन्ध्ये , धर्मश्च जानाति नरस्य वृत्तम् । भगवति वनदेवते ! आवयोर्मध्ये यश्चौरस्तं कथय " ।अथ पापबुद्धिपिता शमीकोटरस्थः प्रोवाच -- "भोः श्रृणुत, श्रृणुत धर्मबुद्धिना हृतमेतद् धनम् । "

तदाकर्ण्य सर्वे ते राजपुरुषा विस्मयोत्फुल्ललोचना यावद्धर्मबुद्धेर्वित्तहरणोचितं निग्रह शास्त्रदृष्ट्यावलोकयन्ति तावद्धर्मबुद्धिना

तच्छमीकोटरं वह्निभोज्यद्रव्यैः परिवेष्ठ्य वह्निना सन्दीपितम् । अथ ज्वलति तस्मिञ्शमीकोटरेऽर्धदग्धशरीरः स्फुटितेक्षणः करुणं परिदेवयन् पापबुद्धिपिता निश्चक्राम । ततश्च तैः सर्वैः पृष्टः -- " भोः ! किमिदम् ?" इत्युक्ते स पापबुद्धिविचेष्टितं सर्वमिदमिति निवेदयित्वोपरतः । अथ ते राजपुरुषाः पापबुद्धिं शमीशाखायां प्रतिलम्बय, धर्मबुद्धिं प्रशस्येदमूचुः - अहो, साध्विदमुच्यते -- उपायं चिन्तयेत्प्राज्ञस्तथापायं च चिन्तयेत् ।

## 3. बक-नकुल-कथा

उपायं चिन्तयेत्प्राज्ञस्तथापायं च चिन्तयेत् ।

पश्यतो बकमूर्खस्य नकुलेन हता बकाः ॥

अस्ति कस्मिंश्चिद्वनोद्देशे बहुबकसनाथो वटपादपः । तस्य कोटरे कृष्णसर्पः प्रतिवसति स्मः । स च बकबालकानजातपक्षानपि सदैव भक्षयन् कालं नयति स्मः ।अथैको बकस्तेन भक्षितान्यपत्यानि दृष्ट्वा शिशुवैराग्यात्सरस्तीरमासाद्य वाष्पपूरितनयनोऽधोमुखस्तिष्ठति । तञ्च तादृक्चेष्टितमवलोक्य कुलीरकः प्रोवाच -- "माम! किमोवं रुद्यते भवताद्य ?

स आह -- "भद्र! किं करोमि ? मम मन्दभाग्यस्य बालकाः कोटरनिवासिना सर्पेण भक्षिताः । तद् दुःखदुःखितो रोदिमि । तत्कथय मे यद्यस्ति कश्चिदुपायस्तद्विनाशाय ।तदाकर्ण्य कुलीरकश्चिन्तयामास -- "अयं तावदस्मज्जातिसहजवैरी।अतस्तत्तथा सत्यानृतमुपदेशं प्रयच्छामि, यथान्येऽपि सर्वे बकाः सक्षयमायान्ति ।" । उक्तञ्च --

नवनीतसमां वाणीं कृत्वा चित्तं तु निर्दयम् ।

तथा प्रबोध्यते शत्रुः सान्वयो म्रियते यथा ॥

आह च -- "माम! यद्येवं तन्मत्स्यमांसखण्डानि नकुलविलद्वारात्सर्पकोटरं यावत्प्रक्षिप, यथा नकुलस्तन्मार्गेण गत्वा तं दुष्टसर्पं विनाश्यति ।"अथ तथानुष्ठिते मत्स्यमांसानुसारिणा नकुलेन तं कृष्णसर्पं निहत्य तेSपि तद् वृक्षाश्रयाः सर्वे बकाः शनैः शनैर्भक्षिताः ।

## 4. नृपसेवकवानर-कथा

तस्माच्चिरायुरिच्छत नृपेण मूर्खोऽनुचरो न रक्षणियः ।कस्यचिद्राझो नित्यं वानरोऽतिभक्तिपरोऽङ्गसेवकोऽन्तःपुरेऽप्यप्रतिषिद्ध्प्रसरोऽतिविश्वासस्थानप्रभूत् ।एकदा राज्ञो निद्रागतस्य वानरो व्यजनं नीत्वा वायुं विदधति राझो वक्षःस्थलोपरि मक्षिकोपविष्टा । व्यजनेन मुहुर्मुहुर्निषिध्यमानापि पुनः पुनस्तश्रैथपविशति । ततस्तेन स्वभावचपलेन मूर्खेण वानरेण क्रुधेन सता तिक्ष्णं खड्गमादाय तस्या उपरि प्रहारो विहितः । ततो मक्षिका उड्डिय गता । तेन शितधारेणासिना राझो वक्षो द्विधा जातं, राजा मृतश्च ।

## 5. कीलोत्पाटि वानरकथा

अव्यापारेषु व्यापारं यो नरः कर्तुमिच्छति ।

स एव निधनं यति कीलोत्पाटीव वानरः ॥

कस्मिंमश्चिन्नगराभ्याशे केनापि वणिक्पुत्रेण तरुषण्डमध्ये देवतायतनं कर्तुमारब्धम् । तत्र च ये कर्मकाराः स्थपत्यादयस्ते मध्याह्नवेलायामाहारार्थं नगरमध्ये गच्छन्ति ।अथ कदाचिदानुषङगिकं वानरयुथमितश्चेतश्च परिभ्रमदागतम् । तत्रैकस्य कस्यचिच्छिल्पिनोऽर्धस्फ़ाटितोऽर्जुनवृक्ष्यदारुमयः स्तम्भः खदिरकीलेन मध्यानिहितेन तिष्ठति । एतस्मिन्नन्तरे ते वानरास्तरुशिखरपरासादशृङ्गदारुपर्यन्तेषु यथेच्छया क्रिडितुमारब्धाः ।एकश्च तेषां प्रत्यासन्नमृत्युश्चापल्यात्तस्मिन्नर्धस्फ़ोटितस्तम्भे उपविश्य पाणिभ्यां कीलकं संगृह्य यावदुत्पाटयितुमारेभे, तावत्तस्य स्तम्भमध्यगतवृषणस्य स्वस्थानाच्चलितकीलकेन यद्वृत्तं तत्प्रागेव निवेदितम् ।

## 6. मण्डूकमन्दविषसर्प कथा

अपमानं पुरस्कृत्य मानं कृत्वा तु पृष्ठतः ।

स्वार्थमभ्युद्धरेत्प्राज्ञः स्वार्थभ्रंशो हि मूर्खता ॥

स्कन्धेनापि वहेच्छत्रुं कालमासाद्य बुद्धिमान् ।

वहता कृष्णसर्पेण मण्डूका विनिपातिताः ॥

अस्ति वरुणाद्रिसमीपे एकस्मिन् प्रदेशे परिणतवया मन्दविषो नाम कृष्णसर्पः । स एवं चित्ते सञ्चिन्तितवान् -- "कथं नाम मया सुखोपायवृत्त्या वर्तितवयम्" इति । ततो बहुमण्डूकं ह्रदमुपगम्याधृतिपरीतमिवात्मानं दर्शितवान । अथ तथास्थिते तस्मिन्नुदकप्रान्तगतेनैकेन मण्डूकेन पृष्टः -- "माम ! किमद्य यथापूर्वमाहारार्थं न विहरसि ?"

सोऽब्रवीत् -- "भद्र ! कुतो मे मन्दभाग्यस्याहाराभिलाषः ! यत्कारणम् -- अद्य रात्रौ प्रदोषे एव मयाहारार्थं विहरमाणेन दृष्ट एको मण्डूकः । तद् ग्रहणार्थं मया क्रमः सञ्चितः । सोऽपि मां दृष्ट्वा मृत्युभयेन स्वाध्यायप्रसक्तानां ब्राह्मणानामन्तरपक्रान्तो न विभावितो मया क्वापि गतः । तत्सदृशमोहितचित्तेन मया कस्यचिद् ब्राह्मणसूनोर्ह्रदतटजलान्तःस्थोऽङ्गुष्ठो दष्टः । ततोऽसौ सपदि पञ्चत्वमुपागतः ।

अथ तस्य पित्रा दुःखितेनाहं शप्तो यथा -- "दुरात्मन् ! त्वया निरपराधो मत्सुतो दष्टः । तदनेन दोषेण त्वं मण्डूकानां वाहनं भविष्यसि । तत्प्रसादलब्धजीविकया च वर्त्तिष्यसे" इति । ततोऽहं युष्माकं वाहनार्थमागतोऽस्मि ।तेन स सर्वमण्डूक नामिदमावेदितम् । ततस्तैः प्रहृष्टमनोभिः सर्वैरेव गत्वा जलपादनाम्नो दर्दुरराजस्य विज्ञप्तम् । अथासावपि मन्त्रिपरिवृतोऽत्यद्भुतमिदमिति मन्यमानः ससम्भ्रमं ह्रदादुत्तीर्य मन्दविषस्य फणिनः फणप्रदेशमधिरूढः । शेषा अपि यथा ज्येष्ठं ततेपृष्ठोपरि समारूरूहुः । किं बहुना, तदुपरि स्थानमप्राप्तवन्तस्तस्यानुपदं धावन्ति ।

मन्दविषोऽपि तेषां तुष्ट्यर्थमनेकप्रकारानं गतिविशेषानदर्शयत् । अथ जलपादो लब्धतदसङ्गसंस्पर्शसुखस्तमाह --

"न तथा करिणा यानं तुरगेण रथेन वा ।

नरयानेन नावा वा यथा मन्दविषेण मे ॥"

अथाऽन्येद्युर्मन्दविषश्छद्मना मन्दं-मन्दं विसर्पति । तञ्च दृष्ट्वा, जलपादोब्रवीत् -- "भद्र मन्दविष ! यथापूर्व किमद्य साधु नोह्यते ?" । मन्दविषोऽब्रवीत् -- "देव ! अद्याहारवैकयान्न मे वोढुं शक्तिरस्ति ।" अथासाब्रवीत् -- " भद्र ! भक्ष्य क्षुद्रमषडुकान् । तच्छ्रुत्वा प्रहर्षितलर्वगात्रो मन्दविषः ससम्भ्रमभ्रवीत् -- " ममायमेव विप्रशापोऽस्ति । तत्तवानेनानुज्ञावचनेन प्रीतोऽस्मि ।"

ततोऽसौ नैरन्तर्येण मण्डूकान् भक्षयन् कतिपयैरहोभिर्बलवान् संवृत्तः । प्रहृष्टश्चानतर्लीनमवहस्येदमब्रवीत् --

"मण्डूका विविधास्वादाश्छलपूर्वोपसाधिताः ।

क्यन्तं कालभक्षीणा भवेयुः खादतो मम् ॥"

## 7. सिंहशृगालपुत्रयो कथा

शूरश्च कृतविद्यश्च दर्शनीयोऽसि पुत्रक ।

यस्मिन् कुले त्वमुत्पन्नो गजस्तत्र न हन्यते ॥

कस्मिंश्चिदुद्देशे सिंहदम्पति प्रतिवसतः स्म । अथ सिंही पुत्रद्वयमजीजनत् सिंहोऽपि नित्यमेव मृगान् व्यापाद्य सिंह्ये ददाति । अथान्यस्मिन्नहनि तेन किमपि नासादितम् । वने भ्रमतोऽपि तस्य रविरस्तं गतः । अथ तेन स्वगृहमागच्छता श्रृगाल शिशुः प्राप्तः । स च बालकोऽयमित्यवधार्य, यत्नेन दंष्ट्रामध्यगतं कृत्वा सिंह्यौ जीवन्तमेव समर्पितवान् । ततः सिंह्यभिहितं -- "भो कान्त ! त्वयानीतं किंञ्चिदस्माकं

भोजनम् ?" । सिंह आह -- "प्रिये ! मयाद्यैनं श्रृगालशिशु परितज्य न किञ्चित्सत्त्वमासादितम् । स च मया बालोऽयमिति मत्वा न व्यापादितो विशेषात्स्वजातीयश्च । उक्तञ्च --

स्त्रीविप्रलिङ्गिबालेषु प्रहर्त्तव्यं न कहिचित् ।

प्राणात्ययेऽपि सञ्जाते विश्वस्तेषु विशेषतः ॥

इदानीं त्वमेनं भक्षयित्वा पथ्यं कुरु । प्रभातेऽन्यत्किञ्चिदुपार्जयिष्यामि । सा प्राह -- "भोः कान्त ! त्वया बालकोऽयमिति विचिन्त्य न हतः तत्कथमेनमहं स्वोदरार्थे विनाशयामि ? उक्तञ्च -- "

अकृत्यं नैव कर्तव्यं प्राणत्यागेऽप्युपस्थिते ।

न च कृत्यं परित्याज्यमेष धर्मः सनातनः ॥

तस्मान्ममायं तृतीयः पुत्रो भविष्यति ।"। इत्येवमुक्त्वा सा तमपि स्वस्तनक्षीरेण परां पुष्टिमनयत् । एवं ते त्रयोऽपि शिशवः परस्परज्ञातजातिविशेषा एकाहार-विहारा बाल्यसमयं निर्वाहयन्ति स्म ।अथ कदाचित्तत्र वन भ्रमन्नरण्यगजः समायातः । तं दृष्ट्वा तौ सिंहसुतौ द्वावपि कुपिताननौ तं प्रति प्रचलितौ यावत्, तावत्तेन श्रृगालसुतेनाभिहितम् -- "अहो, गजोऽयं युष्मत्कुलशत्रुः । तन्न गन्तव्यमेतस्याभिमुखम्" । एवमुक्तवा गृहं प्रति प्रधावितः । तावपि ज्येष्ठबान्धवभङ्गान्निरुत्साहतां गतौ ।अथवा, साध्विदमुच्यते --

एकेनापि सुधीरेण सोत्साहेन रणं प्रति ।

सोत्साहं जायते सैन्यं भग्ने भङ्गमवाप्नुयात् ॥

तथा च

अतएव हि वाञ्छन्ति भूपा योधान् महाबलान् ।

शूरान् वीरान् कृतोत्साहान् वर्जयन्ति च कातरान् ॥

अथ तौ द्वावपि गृहं प्राप्य पित्रोरग्रतो विहसन्तौ ज्येष्ठभ्रातृचेष्टितमूचतुः । यथायं गजं दृष्ट्वा दुरतोऽपि प्रनष्टः । सोऽपि तदाकर्ण्य कोपाविष्टमनाः प्रस्फुरिताधरपल्लवस्ताम्रलोचनस्त्रिशिखां भृकुटि कृत्वा तौ विभर्त्सयन् परुषतरवचनान्युवाच । ततः सिंह्या एकान्ते नीत्वा प्रबोधितोऽसौ -- "वत्स ! मैवं कदाचिज्जल्प । भवदीयलघुरभ्रातरावतौ" इति । अथासौ सान्त्ववचनेन प्रभूततरकोपाविष्टस्तामप्युवाच । "किमहेमताभ्यां शौर्येण, रुपेण, विद्याभ्यासेन, कौशलेन, वा हीनो, येन मामुपहसतः ? तन्मयावश्यमेतौ व्यापादनीयौ ।"

तदाकर्ण्य सिंही तस्य जीवितमिच्छन्त्यन्तविहस्य प्राह --

"शूरोऽसि कृतविद्योऽसि दर्शनीयोऽसि पुत्रक ।

यस्मिन् कुले त्वमुत्पन्नो गजस्तत्र न हन्यते ॥"

तत्सम्यक् श्रृणु -- "वत्स ! त्वं श्रृगालीसुतः । मया कृपया स्वस्तनक्षीरेण पुष्टिं नीतः । तद्यावदेतौ मत्पुत्रौ शिशुत्वात्त्वां श्रृगालं न जानीतः, तावदे द्रुततरं गत्वा स्वजातीयानां मध्ये मिलितो भव । न चेदाभायां हतो मृत्युपथं समेष्यसि ।" । सोऽपि तद्वचनं श्रुत्वा भयव्याकुलमनाः शनैः शनैरपस्वजात्या मिलितः।

## Develop the outline into a story

**1. लब्धवरः - वृत्रासुरः देवानपीडयत्- पराजिताः इन्द्रादयः स्वर्लोकात् पलायिताः इन्द्रः ब्रह्माणमुपेत्य दुर्दशा न्यवेदयत्। तस्य प्रार्थनां श्रुत्वा उपायं निर्दिदेश। दधीचिमहर्षिम् उपगम्य तस्य अस्थीनियाचतु- तैः अस्थिभिः निर्मितेन आयुधेनैव वृत्रः हन्तुं शक्य- देवेन्द्रः दधीचिमहर्षेः आश्रमं प्राप -। स्वदुर्दशायां खिन्नः इन्द्रः दुःखकारणं न्यवेदयत् - दधीचिः स्वप्राणान तत्याज- तस्य अस्थीनि गृहीत्वा वज्रायुधं निर्माय -वृत्रं जघान ।**

पुरा ब्रह्मणः लब्धवरः वृत्रासुरः देवानपीडयत्। तेन पराजिताः इन्द्रादयः स्वलोकात् पलायिताः। युद्धे वृत्रासुरेण पराजिताः देवाः येनकेनापि मार्गेण तं हन्तुम् ऐच्छन्। इन्द्रः ब्रह्माणमुपेत्य देवानां दुर्दशा न्यवेदयत्। तस्य प्रार्थनां श्रुत्वा विधाता वृत्रवधाय उपायं निर्दिदेश। "भवान् दधीचिमहर्षिम् उपगम्य तस्य अस्थीनियाचतु। तैः अस्थिभिः निर्मितेन आयुधेनैव वृत्रः हन्तुं शक्यः" इति।ब्रह्मणः निर्देशमनुसृत्य देवेन्द्रः दधीचिमहर्षेः आश्रमं प्राप। महात्मा दधीचिः यथोचितं तं स्वीचकार। "भवतः आगमनेन अहं सन्तुष्टोऽस्मि। भवान् किमर्थमागतः" ? इति महर्षिः इन्द्रमपृच्छत्। स्वदुर्दशायां खिन्नः इन्द्रः महर्षिं प्रणम्य दुःखकारणं तस्मै एवं न्यवेदयत् - "लोकत्रयकण्टकेन वृत्रेण पीडिताः वयम्। तस्य नाशाय भवतः साहाय्यम् आवश्यकम्" इति। इन्द्रः ब्रह्मणः निर्देशानुसारं वज्रायुधनिर्माणार्थंदधीचिम् अस्थीनि अयाचत। देवेन्द्रस्य प्रार्थनां परिगणयन दधीचिः समाधिमास्थाय स्वप्राणान तत्याज। इन्द्रः तस्य अस्थानि गृहीत्वा वज्रायुधं निर्माय तेन वृत्रं जघान।

**2. सान्दीपनिः नाम मुनिः - द्वौ शिष्यौ - श्रीकृष्ण: कुचेलः - विद्यां समाप्य गृहं गतौ- श्रीकृष्णः पत्नीभिः सह -द्वारकाम् - कुचेल महता कष्टेन - -भिक्षां स्वीकृत्य दिनानि अनयत्- कुचेलपत्नी तस्य समीपम् आगत्य अवदत् -श्रीकृष्णः भवतः सतीर्थ्यः सखा खलु - तस्य समीपं गत्वा प्रार्थयते - सः अस्मान् दारिद्र्यात् मोचयिष्यति - कुचेलः द्वारकाम् अगच्छत्- पृथकं वहन् आसीत् - कृष्णः धावित्वा तम् आश्लिष्यत्- रुग्मिणीसहितः कृष्णः कुचेलं विविधैः प्रकारैः सत्कृतवान् - पृथुकं बलाद् आकृष्य भुक्तवान् - प्रातः प्रबुध्य कुचेलः स्वगृहं प्रातिष्ठत- भगवन्तं यत्किञ्चिदपि न प्रार्थयते- स्वगृहसमीपं प्राप। स्वगृहस्थाने मणिमन्दिरं दृष्ट्वा अभवत्- एतत्सर्वं भगवतः कारुण्येन एवेति-**

पुरा सान्दीपनिः नाम कश्चन मुनिः आसीत्। तस्य बहुषु शिष्येषु द्वौ शिष्यौ आस्तां श्रीकृष्ण: कुचेलः च। तौ सुहृदौ यथाकालं विद्यां समाप्य गृहं गतौ। श्रीकृष्णः पत्नीभिः सह ससुखं द्वारकाम् आवसत्। अतीव दरिद्रः कुचेलस्तु महता कष्टेन

पत्नीपुत्रादिभिः सह भिक्षां स्वीकृत्य दिनानि अनयत्। एकदा आहारार्थं विलपतः पुत्रान् विलोक्य दुःखिता कुचेलपत्नी तस्य समीपम् आगत्य एवम् अवदत् - "नाथ! द्वारकाधिपतिः श्रीकृष्णः भवतः सतीर्थ्यः सखा च खलु। तस्य समीप गत्वा यदि भवान् प्रार्थयते तर्हि सः अस्मान् दारिद्र्यात् मोचयिष्यति नूनम्" इति ।धनादिष निस्पहोऽपि स कचेल प्रियायाःवचनम् आकर्ण्य कृष्णदर्शनकौतुकात् द्वारकाम् अगच्छत्। गमनसमये प्रियया सन्तोषपूर्वम् उपायनार्थं दत्त पृथकमपि वहन् आसीत्। मार्गे "कृष्ण कृष्णमुकुन्द जनार्दन ......." इत्यादीनिकृष्णनामानि जपन् द्वारकां प्राप च । दूरादेव सतीर्थ्यं कुचेलं दृष्ट्वा हर्षपुलकितः कृष्णः धावित्वा तम् आश्लिष्यत्।ततः कृष्णः तं सौधमानीय तल्पे उपावेशयत्। रुग्मिणीसहितः कृष्णः कुचेलं विविधैः प्रकारैः सत्कृतवान् । श्रीकृष्णः कुचेलेन आनीतं पृथुकं बलाद् आकृष्य भुक्तवान्। द्वावपि गुरुकुलवासकथाः कथयन्तौ रात्रिम् अनयताम्। प्रातः प्रबुध्य कुचेलः स्वगृहं प्रातिष्ठत। सः भगवन्तं यत्किञ्चिदपि न प्रार्थयते स्म। पथि "पत्नी किं वदेयम्" इति चिन्तयन्, भगवन्तम् एव मनसि ध्यायन् स्वगृहसमीपं प्राप। सः स्वगृहस्थाने मणिमन्दिरं दृष्ट्वा अद्भुतस्तब्धः अभवत्। तस्य अन्तः प्रविश्य सखीभिः परिवृतां सुवर्णैः भूषणैः वस्त्रैः च अलङ्कृतां प्रियतमा पुत्रांश्च दृष्ट्वा 'एतत्सर्वं भगवतः कारुण्येन एवेति' निश्चितवान्। प्रार्थनां विना भूरि सम्पत्प्रदानेन भक्तजनान् परिपालयन्तं भगवन्तं कृष्णं मनसि ध्यायन् कालं निनाय कुचेलः ।

**3. एकदा अनावृष्टिः सञ्जाता- शुष्कानि जातानि- पिपासाकुलः मृताः सञ्जाता- केचन मृतप्रायाः चाभवन् - जनाश्च देशं त्यक्त्वा समीपप्रदेशेषु वस्तुम् आरब्धाः - कोऽपि महर्षिः देशं तं प्राप - तम् उपचारपूर्व स्वीचक्रुः- तस्मै निवेदयामासुः- "समीपस्थे भूमौ जलसञ्चयोऽस्ति - कूप खन्यते चेत् प्रभूतं जलं लभ्येत-**

एकदा ब्रह्मपुरनामके जनपदे अनावृष्टिः सञ्जाता। वापीकूपतटाकादीनि शुष्कानि जातानि। जन्तवः पक्षिणश्च पिपासाकुलः मृताः सञ्जाता । केचन मृतप्रायाः चाभवन्। जनाश्च तं देशं त्यक्त्वा समीपप्रदेशेषु वस्तुम् आरब्धाः ।एवं जनेषु सन्तपत्सु एकस्मिन् दिने कोऽपि महर्षिः देशं तं प्राप। महर्षिणं दृष्ट्वा जनाः उपगम्य तम् उपचारपूर्व

स्वीचक्रुः। देशस्यावस्थां तस्मै निवेदयामासुः। अवस्थां सम्यक् ज्ञात्वा मुनिरेवमुवाच। “समीपस्थे अस्मिन् प्रदेश एव भूमौ महान् जलसञ्चयोऽस्ति। अत्र कूप खन्यते चेत् प्रभूतं जलं लभ्येत। सम्पूर्णस्य ग्रामस्य जलदौर्लभ्यं परिहर्तुं शक्यते च”।तच्छ्रुत्वा ग्रामवासिनः अवदन् “महर्षे साधूक्तं भवता।”

## Sanskrit Essays

### 1. पर्यावरणम्

अस्मान् परितः यानि पञ्चमहाभूतानि सन्ति तेषां समवायः एव परिसरः अथवा पर्यावरणम् इति पदेन व्यवह्रीयते । इत्युक्ते मनुष्यो यत्र निवसति, यत् खादति, यत् वस्त्रं धारयति, यज्जलं पिबति यस्य पवनस्य सेवनं करोति,तत्सर्वं पर्यावरणम् इति शब्देनाभिधियते। अधुना पर्यावरणस्य समस्या न केवलं भारतस्य अपितु समस्तविश्वस्य समस्या वर्तते। यज्जलं यश्च वायुः अद्य उपलभ्यते, तत्सर्वं मलिनं दूषितं च दृश्यते अथवा भारतस्य राजधानी अस्ति। पर्यावरणम् पश्यतु। भारतस्य राज्येषु अन्यतमम् अस्ति । पर्यावरणम् भारतदेशस्य राजधानी विश्वस्य अतिविशालासु नगरीषु अन्यतमा इति गण्यते । पर्यावरणम् एषा भारतस्य तृतीया बृहती नगरी वर्तते । इत्यपि विश्रुता इयं नगरी पाचीनकाले हस्तिनापुरमिति ख्याता आसीत् । इन्द्रसभायामपि सभाजितानां भरतकुलोत्पन्नानां महीपालानां राजधानी अद्यतनीया एव ।पर्यावरणम् मुगलवंशीयानां चक्रवार्तिनां तथा आङ्गलानामपि अधिकारिणां केन्द्रभूमिर्भूत्वा अधुनापि भारतीयगणराज्यस्य राजधनीपदमलङ्करोति ।पर्यावरणम् सर्वेषु प्रेक्षणीयेषु स्थानेषु बिर्लामन्दिरमिति ख्यातं लक्ष्मीनारायणमन्दिरं विशेषतया उल्लेखनीयम् । यतः मन्दिरमिदं भारतीयचरित्रं संस्कृतिञ्च प्रकटयति तथा भृशं विस्मयमपि जनयति । भारतदेशस्य जीवननिरूपकं संसद्भवनम् अस्ति ।पर्यावरणम् अत्रैव उच्चतमन्यायप्रदाता अत्युच्चन्यायालयो वर्तते । पर्यावरणम् सर्वप्रधानपदमलङ्कृतवान् राष्ट्रपतिः एव विराजते । अतः भारतस्य हृदयमेव यमुनातीरे परिविस्तृता दशाधिकक्रोशमितभूभागम् आक्रम्य अवतिष्ठते । क्रिस्तपूर्वप्रथमशतकस्य मौर्याधिपेन छिलिना छिल्लीति नामाङ्कितेयं नगरी तदनन्तरं पर्यावरणम् बभूव ।

पर्यावरणम् नगरीयं पुराणनवोपभागाभ्यां द्विधा विभक्ता । अस्मान् परितः यानि पञ्चमहाभूतानि सन्ति तेषां समवायः एव परिसरः अथवा पर्यावरणम् इति पदेन व्यवह्रीयते ।

## 2. भारतीयसंस्कृतिः

पुरातनः इतिहासः, अनन्या भौगोलिकरचना, वैविध्यमयाः जनसमूहाः, धर्माः, विभिन्नाः सम्प्रदायाः, अनेके उत्सवाः, नैकानि आचरणानि, प्राचीनपरम्परा, परितः विद्यमानानां देशानां प्रभावः – एवं विभिन्नाः विषयाः भारतीयसंस्कृतिम् अरचयन् । सिन्धुखाततः आरब्धा भारतीया संस्कृतिः वेदकाले महता प्रमाणेन विकसिता अभवत् । बौद्धधर्मस्य उन्नतिः-अवनतिः च, भारतस्य सुवर्णयुगं, यवनानाम् आक्रमणं, यवनानां शासनं, अन्यदेशीयानां शासनम् इत्येतेषु कालेषु भारतीयसंस्कृतेः विस्तारः, विविधता च अधिका अभवत् । भारतस्य धार्मिकाणि आचरणानि, भाषाः, पद्धतयः, सम्प्रदायाः च गतेभ्यः ५०००वर्षेभ्यः अस्याः अनन्यसंस्कृतेः साक्षिरूपेण सन्ति । विभिन्नानां धर्माणां, सम्प्रदायानां संयोजनम् अपि जातम् अस्ति भारतीयसंस्कृतौ । एतस्याः संस्कृतेः प्रभावः जगतः अन्यासां संस्कृतीनाम् उपरि अपि जातः अस्ति महता प्रमाणेन ।हिन्दुधर्मस्य, बौद्धधर्मस्य, जैनधर्मस्य, सिख्-धर्मस्य जन्मभूमिः भारतम् । समग्रे विश्वे एव अब्रहां धर्माणाम् अनन्तरस्य स्थानम् अस्ति भारतीयधर्माणाम् । तत्रापि हिन्दुधर्मः जगति एव तृतीयः महाधर्मः । चतुर्थे स्थाने अस्ति बौद्धधर्मः । एतयोः द्वयोः धर्मयोः अनुयायिनः १.४ शतकोट्यपेक्षया अधिकाः सन्ति । भारतं विश्वे एव महान् धार्मिकवैविद्यतायाः देशः । अत्रत्यानां जनानां जीवने अद्यापि धर्मः निर्णायकं पात्रं निर्वहति । भारतस्य पमुखः धर्मः हिन्दुधर्मः । यतः अत्रत्यायाः जनसंख्यायाः ८०.४ % अपेक्षया अपि अधिकाः हिन्दुधर्मम् अनुसरन्ति । १३.४% जनाः इस्लां धर्मम् अनुसरन्ति । सिख्-जैन-बौद्धधर्माणां जनाः न केवलं भारते अपि तु विश्वस्य सर्वेषु भागेषु व्याप्ताः सन्ति । विश्वस्य अन्येषां मतानां क्रैस्त-झोराश्ट्रियन्-यहूद्य-बहायि-मतानाम् अनुयायिनः अपि अल्पप्रमाणेन सन्ति अत्र । तैः सह एव नास्तिकाः आज्ञेयतावादिनः अपि सन्ति भारते ।

## 3. विद्यायाः महत्त्वम्

पण्डितैः उक्तं, यत् विद्याधनं सर्वेषु धनेषु प्रधानम्। विद्यायाः विषये संस्कृते बहूनि सुभाषितानि रचितानि। प्रत्येकसुभाषिते विद्यायाः महत्त्वम् दत्तम्।विद्या धनतुल्यः इति कथ्यते। परम् एतत् विद्याधनं साधारणधनवत् नास्ति। विद्यधनस्य व्ययेन तस्य क्षयः न, परं तस्य वर्धनम् एव भवति। इदं विद्याधनं हर्तुं अपि न शक्यते। चौरेण वा राज्ञा वा तत् हर्तुं न शक्यते। अस्य विद्याधनस्य भारोऽपि न अनुभूयते। विद्यधनस्य भ्रातृषु विभाजनम् अपि न कर्तुं शक्यते। विद्या तु सत्यमेव सर्वधनप्रधानम्। प्रवासेषु विद्या मित्रवत् अस्ति।विद्यायाः कारणात् मनुष्यस्य तेजः वर्धते। विद्या परमं भूषणम्। विद्यया एव मनुष्यस्य कार्यक्षमता वर्धते। सर्वेषु जीवेषु मनुष्यः विशेषः, यतः तस्य समीपे विद्या वर्तते। अतः विद्यविहीनः जनः पशुवत् एव अस्ति। ज्ञानेन मनुष्यः जगति कीर्तिवान् भवति। तस्य ज्ञानसम्पत्तेः कारणात् सः सर्वत्र सम्मानितः।विद्यायाः विषये, सत्यमेव उक्तम्'विद्या परमं बलम्।'

सुखं प्राप्तुं विद्यार्जनम् आवश्यकमस्ति । अतः कथ्यते-

विद्यां ददाति विनयंविनयाद् याति पात्रताम्।

पात्रत्वात् धनमाप्नोतिधनात् धर्मं ततः सुखम्॥

## 4. महाभारतम्

महाभारतम् महर्षिणा वेदव्यासेन विरचितः बहुप्रसिद्धः इतिहासः विद्यते। अस्मिन् ग्रन्थे कौरव-पाण्डवानां महायुद्धं मुख्य-विषयरूपेण वर्णितमस्ति। मानवजीवनस्य धर्म-अर्थ-काम-मोक्ष-रूपाः समस्तपुरुषार्थाः अत्र विशालग्रन्थे सन्निवेशिताः। अस्य महाभारतस्य भीष्मपर्वणि श्रीमद्भगवद्गीता विद्यते। भगवता कृष्णेन मोहग्रस्तम् अर्जुनं प्रति ज्ञान-कर्म-भक्ति-विषयकः उपदेशः गीतायां प्रदत्तः।

अस्यां गीतायामपि अष्टादश अध्यायाः सन्ति। मानव-जीवनस्य विविधविषयाः अत्र समीचीनतया प्रतिपादिताः सन्ति। इयं विश्वजनीन-कृतिः कालजयिनी चिरन्तनी एव। प्रथमं महाभारतम् इतिहासः पुराणम् आख्यानकञ्चेति नामभिः आख्यायते स्म । साम्प्रतिकास्तु महाभारतम् आचारशास्त्रम् नीतिशास्त्रम् धर्मार्थकाममोक्षाख्यचतुर्वर्गसाधनम् चामनन्ति । भारतं पञ्चमो वेदः इति सर्वत्र प्रचारितम् । सर्वत्रास्मिन् ग्रन्थे वैष्णवसिद्धान्तानां प्रमुखत्वेन प्रतिपादनात् महाभारतं वैष्णवस्मृतिरप्याख्यायते । महाभारतस्य अशीतिप्रतिशतभागोऽनेकविधोपदेशमयः, विंशतिप्रतिशतभाग एवेतिहासप्रतिपादक इति अस्य नीतिशास्त्रेषु गणनोचिता |

महाभारतस्य संक्षेपेण वर्णिता कथा एवं वर्तते - उत्तरभारतस्य राज्ञो दुष्यन्तस्य पुत्रस्य भरतस्य वंशधरस्य शान्तनोः प्रपौत्रो -धृतराष्टपाण्डवौ आस्ताम्। अग्रजन्मा धृतराष्टः नेत्रहीनः इति हेतोः सर्वैः पाण्डुरेव राजसिंहासनेऽभिषिक्तः। कालान्तरेण पाण्डुः पञ्चत्वं प्राप्तः। तदा पञ्चपाण्डवाः - युधिष्ठिरः - भीमः - अर्जुनः - नकुलः - सहदेवश्च निखिलानि शास्त्राणि वेदाञ्च अधीतवमन्तः । प्रकृतयः युधिष्ठिस्य शौचेन, भीमसेनस्य धृत्या, अर्जुनस्य विक्रमेण, नकुलसहदेवयोः गुरुशुश्रूषया, शान्त्या विनयेन च, समेषां तेषां शौर्यगुणेन च अति सन्तुष्टा अभवन्। पाण्डवानाम् अभ्युदयम् असहमानः दुर्योधनः छलेन तेषां राज्यम् अपहर्तुं बहुकृतप्रयत्नोऽपि विफलोऽभवत्। तदा स्वमातुलशकुनिसाहाय्येन घूतक्रीडायां कपटेन पाण्डवान् पराजित्य द्रौपदीञ्च स्वानुजेन दुःशासनेन सभामानाय्य अपमाननं कर्तुं प्रायतत । श्रीकृष्णेन रक्षिता द्रौपदी। पराजिताः पाण्डवाः कृतसमयानुसारं द्वादशवर्षपर्यन्तं वनवासस्य, एकवर्ष-अज्ञातवासस्य च कठिनाम् अवस्थाम् असहन्। ततोऽरण्यात् निवृत्य स्वराज्यम् अयाचन्त । दौत्यार्थं पाण्डवप्रतिनिधिः भूत्वा स्वयं श्रीकृष्णः गतः। परन्तु स्वार्थपरायणः दुर्योधनस्तु - 'केशव ! युद्धं विना सुच्याग्रपरिमितं भूमिमपि न दास्यामि' इति दृढचित्तः सन् अवदत् । फलतः कौरव-पाण्डवानां मध्ये भयङ्करं युद्धं सञ्जातम्। कौरवाः पराजिताः, पाण्डवेषु ज्येष्ठः युधिष्ठिरः राजसिंहासनम् आरोहत् । कालक्रमेण अभिमन्योः पुत्रं परीक्षितं हस्तिनापुरस्य अधिपतिनं विधाय सर्वे पाण्डवाः द्रौपदी च हिमालयं प्रति अगच्छन् -तत्रैव कालकवलतां गताश्च।

## 5. बौद्धधर्मः

भगवता बुद्धेन बौद्धदर्शनं प्रवर्तितम्। भारतीयशास्त्राधारेषु बौद्धदर्शनस्य प्रभावः विशेषतः दृश्यते। बौद्धमूलग्रन्थाः भारते लुप्तप्रायाः सन्ति। विदेशीयपण्डितानां संशोधनस्य फलतः इदानीं केचन् ग्रन्थाः दृश्यन्ते। भगवतः बुद्धस्य अनन्तरं बौद्धेषु बह्व्यः शाखाः उत्पन्नाः। ताश्च चतस्रः प्राधान्येन - वैभाषिकाः, सौत्रान्तिकाः, योगाचाराः, माध्यमिकाः चेति। वैभाषिकाणां हीनयानसम्प्रदायः। अन्येषां त्रयाणां महायानसम्प्रदायः। बौध्दानां 'शून्यवादः' प्रसिध्दः।'यत्र किमपि नास्ति तत्' इति अत्र शून्यपदस्य अर्थः न। बौध्ददर्शने शून्यपदस्य दार्शनिकः विशालः अर्थः अस्ति। बौध्दमतस्य धार्मिकाः बहवः अंशाः 'त्रिपिटके निरूपिताः सन्ति।अस्य दर्शनस्य आद्यप्रवर्तकः श्रीबुद्धः अस्ति। शुद्धोदनस्य मायादेव्याः च सुतः गौतमगोत्रजः क्षत्रियः सिद्धार्थः एव पश्चात् बोधोदयात् बुद्धः इति प्रथितः अभवत् । बौद्धदर्शनस्य परमसिद्धान्तः ‘दुःखस्य मूलम् आशा’ इत्यस्ति। माध्यमिक-योगाचार -सौत्रान्तिक-वैभाषिकभेदात् चतुर्धा विभज्यते ।वेदानां श्रुतपरम्परेव बौद्धधर्मस्यापि ज्ञानोपदेशाय श्रुतपरम्परा प्रचलिता आसीत् । अन्ततः अस्य ज्ञानस्य संरक्षणाय राजगृहे महाकाश्यपस्य अध्यक्षतायामेका बौद्धसंगीतिरायोजिता। तत्र बुद्धशिष्येण आनन्देन सुत्तपिटक-विनयपिटकयोः संग्रहो विहितः। सुत्तपिटकस्यैव कतिपयांशानां विस्तरेण कालान्तरे अभिधम्मपिटकस्य रचना संजाता।

## 6. मदर् तेरेसा

मदर् तेरेसा सुप्रसिद्धा समाजसेविका । रोमन् क्याथोलिक् सम्प्रदायस्य सन्यासिनी आसीत् । अस्याः पूर्वनाम "आग्नेसे गोन्क्से बोजक्सियु" । एषा अल्बेनियादेशीया, किन्तु भारतदेशस्य पौरत्वं प्राप्तवती । १९५० तमे संवत्सरे 'मिषनरीस् आफ् चारिटि' नामकसेवासङ्घं भारतस्य कोलकतानगरे स्थापितवती । अस्याः संस्थायाः केन्द्राणि आभारते स्थापितवती । न केवलं भारते किन्तु

विभिन्नराष्ट्रेषु स्थापितवती । एतेषु केन्द्रेषु अनाथेभ्यः, अस्वस्थेभ्यः, दरिद्रेभ्यः च सर्वविधव्यवस्था कल्पिता अस्ति । ४५ वर्षाणाम् अपेक्षया अधिककालम् एषा सेवां कृतवती । दीनेषु एव देवं भावयन्ती सा सेवां कुर्वती च जीवितवती ।मदर् तेरेसा युगोस्लावियादेशस्य 'स्कूपेज्' ग्रामे १९१० तमे संवत्सरे अगष्ट्मासस्य २७ तमे दिनाङ्के अजायत । अस्याः पिता निकोलास् बोजाक्सिया, माता ड्रेन् फिल् बेक्निल् । अस्याः सप्तमे वयसि पिता मृतवान् । अनन्तरं माता एव तां पालितवती । एनां रोमन् क्याथोलिक् क्रैस्तदेवालयस्य (चर्च्) अनुयायिनीं कृतवती । क्रैस्तदेवालयस्य सेवावातावरणादिकं दृष्ट्वा एषा प्रभाविता जाता । मम जीवने अपि ईदृशसेवाकार्यं करणीयम् इति सा चिन्तितवती । तेषु दिनेषु मया सन्यासदीक्षा स्वीकर्तव्या इति सा सङ्कल्पं कृतवती । तदर्थम् अष्टादशवयसि एव सा गृहात् निर्गता । मातरम्, सहोदरम्, बान्धवान् च त्यक्त्वा समाजसेवाकार्ये निरता जाता ।

## 7. महात्मा गान्धिः

महात्मा गान्धिः इति प्रसिद्धः मोहनदासकरमचन्दगान्धिः (१८६९-१९४८) गुजरातस्य पोरबन्दरनामके नगरे जन्म प्राप्तवान् । तस्य उदारान् मानवीयान् गुणान् दृष्ट्वा कविः रवीन्द्रनाथठाकुरः तं महात्मा इति शब्देन सम्बोधितवान् । ततः पश्चात् सर्वे भारतीयाः तं महात्मा गान्धिः इति एव अभिजानन्ति ।भारतमातुः श्रेष्ठः पुत्रः महात्मा गान्धिः स्वातन्त्र्यान्दोलने सर्वेषां भारतीयानाम् आधारभूतः मार्गदर्शकः च आसीत् । अत एव गान्धिजयन्ती पर्व राष्ट्रियपर्वरुपेण आचर्यते । दक्षिण-आफ्रिकादेशेऽपि महात्मा गान्धिः उत्तमं कार्यं कृतवान् ।

अस्य पिता श्री करमचन्दगान्धिः राजकोटसंस्थाने पोरबन्दरसंस्थाने च दिवान् इति प्रसिद्धः आसीत् । माता श्रीमती पुतलीबायी साध्वी व्रतोपावासादिधर्मानुसारिणी प्रेममयी च आसीत् । मोहनदासगान्धिमहोदयस्य बाल्यं पोरबन्दरनगरे उत्तमपरिसरे सहजसुन्दरम् आसीत् । मातुः सेवाभावः त्यागबुद्धिः सर्वप्रियता इत्येते गुणाः पुत्रेऽपि

परिणामम् अकुर्वन् । विद्याभ्याससमये मोहनदासगान्धिः साधारणबालकः आसीत् । मोहनदासगान्धिः राजकोटनगरे प्रौढविद्याभ्यासं कृतवान् । विनयशीलः लज्जालुः विधेयः इति च सहपाठिषु प्रख्यातः आसीत् । गान्धिमहोदय: सत्यम् अहिंसाम् च जीवने प्रतिष्ठापयितुं दृढव्रत: आसीत् । स: वैदेशिकानां शासनं मूलतः उच्छेत्तुं भारतमातुः स्वतन्त्रतायै दृढां प्रतिज्ञाम् अकरोत् ।

## 8. जवाहरलाल नेहरुः

जवाहरलाल नेहरुः (१८८९-१९६४) प्रयागे जात: ।सः भारतवर्षस्य सर्वाधिककालपर्यन्तं नेतृत्वं कृतवान् तथा च प्रथमः प्रधानमन्त्री आसीत् ।१९४७तः-१९६४तमवर्षपर्यन्तं स: भारतस्य प्रधानमन्त्री आसीत् ।तस्य पितुः नाम मोतीलालनेहरुः । मातु: नाम स्वरूपरानी इति । केम्ब्रिजविश्वविद्यालये स्नातकपरीक्षाम् उत्तीर्य स: विधिवेत्ता अभवत्। तस्य ब्राह्मणकुलोत्पन्नया कमलया सह विवाह: सम्पन्नः।भारतदेशस्य स्वातन्त्र्यम् आगस्ट १५ दिनाङ्के १९४७ वर्षे अभवत् । तदा नेहरु ध्वजारोहणम् अकरोत् । प्रजाप्रभुत्वविषये नेहरु गुणत्वम् अपश्यत् इष्टवान् च। सः सेक्यूलरिसं, लिबरलिसं च इष्टवान् । दरिद्रेभ्यः दीनेभ्यः च साहाय्यकरणं तस्य प्रवृत्तिः आसीत् । नेहरुमहोदयस्य एतादृशाः गुणाः अस्माकं देशस्य संविधानरचनायां सहकरिणः अभवन् । देशस्य औन्नत्यर्थं प्रपञ्चे ये हितकारिणः गुणाः आसन् तान् अत्र स्थापितवान् । तस्य पुत्री इन्दिरा तथा दौहित्रः राजीवः स्वयं देशसेवां कर्तुकामौ देशस्य प्रधानमन्त्रिणौ अभवताम्।

## 9. ए पि जे अब्दुल् कलाम्

अवुल् पकिर् जैनुलाअबदीन अब्दुल् कलामः १५ अक्टोबर् १९३१ – २७ जुलै २०१५ अस्य जन्म क्रि.श. १९३१तमवर्षस्य अक्टोबरमासस्य पञ्चदशे दिने तमिळ्ळनाडुराज्यस्य रामेश्वरम् इति मण्डलस्य धनुष्कोटि इति स्थाने अभवत् ।लोकः एतं डा. अब्दुल् कलाम इत्येव सम्बोधयति । भारतीयगणतन्त्रस्य एकादशः निर्वाचितः राष्ट्रपतिः अभवत् । कलामः प्रसिद्धः वैज्ञानिकः अभियन्ता अविवाहितः च आसीत्

।अस्य जन्म मध्यमवर्गस्य मुस्लिम् कुटुम्बे अभवत् । अस्य पिता जैनुलाब्दीन् तु धनवान् विद्यावान् च नासीत् । सः शुद्धहस्तः अनुशासितः नाविकः आसीत् । धीवरेभ्यः नौकाः भाटकरूपेण यच्छाति स्म । डा. अब्दुल् कालामः भारतस्य एकादशः राष्ट्रपतिः इति निर्वाचितः अभवत् । भारतीयजनतापक्षेण समर्थितः एन्.डि.ए. सङ्घटनं स्वस्य प्रतिनिधिम् अकरोत् यस्य समर्थनं विपक्षं विना अन्ये सर्वे अकुर्वन्। क्रि.श. २००२तमवर्षस्य जुलैमासस्य १८तमे दिने डा. कलामः ९०%बहुमतेन भारतस्य राष्ट्रपतिः अभवत् ।क्रि.श. १९६२तमवर्षे भारतीयान्तरिक्षानुसन्धानसङ्घटने सेवायां नियुक्तः । डा. अब्दुल् कलामः प्रकल्पनिदेशकत्वेन भारतस्य स्वदेशीयोपग्रहस्य (एस्.एल्.वी. तृतीयः)प्रक्षेपणस्य क्षिपणिनिर्माणस्य श्रेयः प्राप्तवान् । डा.कलामः स्वव्यक्तिगते जीवने अपि परिपूर्णः अनुशासितः अस्ति । आजीवनं ब्रह्मचर्यव्रतस्य पालनं सङ्कल्पितवान् । एषः कुरान्ग्रन्थं तथा भगवद्गीतां च समानतया अध्ययनं करोति । स्वयं कलामः बहुत्र उक्तवान् यत् सः तिरुक्कुरल् अपि अनुसरति इति । अस्यभाषणे न्यूनातिन्यूनम् एकस्य कुरलस्य उल्लेखः भवत्येव ।

## 10. जलम्

जलम् एव जीवनम् इति उक्त्यनुसारम् अस्माकं जीवने जलस्य आवश्यकता वर्तते । जीवनाय जलम् आवश्यकं वर्तते । तृष्णायां सत्यां जलेन एव निवारणं भवति । पृथिव्याः जीवानां कृते आवश्यकं तत्त्वम् अस्ति जलम् । अस्माकं सौभाग्यम् अस्ति यत् पृथिवी जलीयः ग्रहः वर्तते । जलं सौरमण्डले दुर्लभं वर्तते । अन्यत्र कुत्रापि जलं नास्ति । पृथिव्यां जलं पर्याप्तम् अस्ति । अतः पृथिवी नीलग्रहः इति उच्यते । जलं निरन्तरं स्वरूपं परिवर्तते । सूर्यस्य तापेन वाष्पस्वरूपं, शीतले सति सङ्घनीकरणे मेघस्वरूपं, वर्षामाध्यमेन जलस्वरूपं धरति । जलं महासागरेषु, वायुमण्डले, पृथिव्यां च परिभ्रमति । जलस्य तत्परिभ्रमणं जलचक्रं कथ्यते । अस्माकं पृथिवी स्थलशाला इव अस्ति । अलवणस्य जलस्य मुख्यं स्रोतः नदी, तडागः, हिमनदी च वर्तते । महासागराणां, समुद्राणां च जलं लावण्यं वर्तते । तस्मिन् जले सोडियम् क्लोराइड्, पाचकलवणं च प्राप्यते । जलम् एकं चक्रीयसंसाधनं वर्तते । पौनःपुन्येन जलस्य

उपयोगः क्रियते। अस्मिन् जलचक्रे जलं महासागरतः धरातलं, धरातलतः महासागरं प्राप्नोति। इदं चक्रं सततं कार्यरतम् अस्ति। पृथिव्यां जीवनाय आवश्यकतत्त्वं वर्तते। जलस्य वितरणं पृथिव्याम् असमानम् अस्ति। केषुचित् क्षेत्रेषु जलम् अधिकमात्रायां प्राप्यते।

## 11. स्वातन्त्र्यदिनोत्सवः

भारतस्वतन्त्रतादिनम् 'अगस्त'-मासस्य पञ्चदशे (१५/८) दिनाङ्के राष्ट्रियोत्सवत्वेन आभारते आचर्यते । १९४७ तमस्य वर्षस्य 'अगस्त'-मासस्य पञ्चदशे दिनाङ्के भारतगणराज्यं स्वतन्त्रम् अभवत् । अतः एतद्दिनं भारतस्वातन्त्र्यदिनोत्सवत्वेन आचर्यते । तत्पूर्वं ब्रिटिश-जनाः भारतस्योपरि शासनं कुर्वन्ति स्म । १९४७ तमस्य वर्षस्य 'अगस्त'-मासस्य चतुर्दशे (१४/८/१९४७) दिनाङ्के मध्यरात्रौ द्वादशवादने आङ्ग्लाः भारतगणराज्यस्य शासनं भारतीयेभ्यः यच्छन्तः भारतत्यागम् अकुर्वन्। भारतस्वतन्त्रतायाः तत् दिनं भारते राष्ट्रियपर्वत्वेन आचर्यते । स्वातन्त्र्योत्सवस्य प्रमुखः कार्यक्रमः देहली-महानगरस्थे रक्तदुर्गे (लालकिला) भारतगणराज्यस्य राष्ट्रपतेः भाषणेन आरभते । ततः प्रधानमन्त्रिद्वाराध्वजारोहणं भवति। अनन्तरं प्रधानमन्त्री सर्वकारस्य कार्याणां योजनां प्राकटयन् सर्वेभ्यः शुभाशयं यच्छति । ततः सर्वेषां राज्यानां राजधानीषु मुख्यमन्त्रिणः ध्वजारोहणं कृत्वा जनेभ्यः शुभाशयं यच्छन्ति ।स्वातन्त्र्यदिने प्रातः सप्तवादने ध्वजारोहणस्य कार्यकालः। ततः भारतगणराज्यस्य राष्ट्रपतिः देशं सम्बोध्य भाषणं करोति। राष्ट्रपतेः भाषणानन्तरंभारतगणराज्यस्य प्रधानमन्त्री देशं सम्बोधयति। तस्मिन् दिने भारतीयत्रिवर्णध्वजः सर्वत्र विराजते।

## 12. कालिदासः

साहित्यलोके असंख्याः कवयः वर्तन्ते इति जानीमः । किन्तु तेषु अत्यल्पानामेव कविताः अहं पठितवान् । तथापि मनसि प्रविष्टानां कवीनां मध्ये कालिदासमहाकविः मम प्रियतमः । तस्मै आसन्दः किञ्चिदुन्नतस्थाने एव मया कल्पितः अस्ति । कारणं किमिति स्पष्टतया अहमपि न जानामि । संस्कृतपठनं यदा आरब्धवान् तथा आरभ्य कालिदासनाम शृणोमि स्म । किन्तु तदा तावत् श्रध्दा नासीत् ।एतस्य अन्तिमं पादं मह्यं बहु अरोचत । अहं तत् प्रत्यक्षमुक्तवान् च । तदा अध्यापकः कालिदासकथां आरम्भतः अवसानपर्यन्तं बहुदिनैः उक्त्वा समापितवान् । तदानीम अहं ज्ञातवान् यत् ट्ण्डंटडण्डं टडडण्डडण्डम् इत्यादयः बहवः श्लोकाः सन्तीति । कालिदासविषये मम जिज्ञासां दृष्ट्वा गुरुः द्वित्रपुस्तकानि मह्यं दत्तवान् । तदहं शीघ्रमेव पठित्वा प्रत्यर्पितवान् च । तदानीं गुरुः उक्तवान् यत् अन्यः कालिदासमधिकृत्य किं वदति इत्यपेक्षया स्वयं कालिदासं पठति चेदेव उत्तमम् इति । ततः आरभ्य गुरोः साहाय्येन कालिदासकृतीः पठितुम् आरब्धवान् । भिन्नभिन्नपुस्तकपठनतः अहं ज्ञातवान् यत् कालिदासस्य कालं, जन्मस्थानं किमधिकं कृतिः च अधिकृत्य पण्डितानां समानाभिप्रायः नास्तीति । तथापि कालिदासः उज्जयिन्यां षष्टशतके जातः इति सामान्याङ्गीकारः अस्ति च । एतत् सर्वं पठित्वा मम एवमभासत कालिदासः जनिं न प्राप्तवान् इति इतिहासकाराः वदन्ति चेदपि तस्य अस्तित्वं न नश्यति यावत् एकः श्लोकः जीवति । अत एव कालिदासस्य देशकालादिविषये चर्चाकरणसमयेन द्वित्रान् वा श्लोकान् पठति चेत् वरम् । तदानीं विक्रमादित्यसदसि नवरत्नेष्वन्यतमः कालिदासः भोजराजेन सह सल्लापं कुर्वन् प्रत्यक्षीभवति ।

## 13. सिन्धुसंस्कृतिः

सिन्धुखातसंस्कृतिः एका कांस्यकालसंस्कृतिः आसीत्। एषा संस्कृतिः १९२० तमे वर्षे पुरातत्वज्ञैः आविष्कृता । सा सिन्धु-सरस्वत्योः नदीतीरे अवर्धत। अस्याः विस्तारः २५०० - १९०० वर्षेषु अभवत्। अस्याः जनाः अनेकानि नगराणि संस्थापितवन्तः। तेषु हरप्पापुरी एव प्रथमा । अतः एव सिन्धुखातसंस्कृतिः

हरप्पासंस्कृतिः इति ख्याता। सिन्धुसंस्कृतेः नगराणि अत्युत्कृष्टाः आसन्। पथाः वीथयः च विशालाः आसन्। सुन्दराणि गृहाणि इष्टिकाभिः निर्मितानि सन्ति। नगरेषु अनेके नौकाश्रयाः धान्यकूटाः वस्तुगृहाणि स्नानगृहाणि च आसन्। पुर्यः भित्तिभिः रक्षिताः। नगरेषु दुर्गाः अपि अवर्तन्त। तेषु जलनिर्गमः अपि आसीत्। पुरीषु अनेके चित्रकाराः शिलपकाराः कुम्भकाराः वणिजः पुरोहिताः च अवसन्।ते अनेकानि सुन्दराणि शिल्पानि निर्मितवन्तः। ते मुद्राः आभरणानि च अरचयन्। ललनाः नेत्राञ्जनं, सिन्दूरं, कङ्कणानि च धारयन्ति स्म। शिशवः क्रीडनकैः क्रीडिन्ति स्म । ते पशुपतिं शिवलिङ्गानि च अपूजयन्। अनेकासु मुद्रासु स्वस्तिकाः आसन्।सिन्धुसभ्यतायाः कालः मिश्रदेशस्य प्राचीनसभ्यतावत् अनिश्चिताऽस्ति । मिश्रदेशस्य सुमेरप्रदेशीय वा सभ्यतायाः कालनिर्णये तत्र प्राप्ताः लेखनसामग्राद्याः बहुसहायकाः अभवन् । इदनीमवधिः सिन्धुलिपेः आविष्कारं न अभूत् । प्रसिद्ध'मेसोपटेमिया'सभ्यतायाः खननसमये तत्र सिन्धुप्रदेशस्य मुद्राः अलभन् । अर्थ्यात् सिन्धुजनानां वाणिज्यं क्रैस्तपूर्वं २६००-२००० शताब्द्यां मेसोपटेमियापर्यन्तं विस्तृतमासीत् । तस्मात् बुधैः अनुमीयते यत् सिन्धुलिपेः कालः ३५००-३००० क्रैस्तपूर्वमस्ति ।सिन्धुप्रदेशतः प्राप्तेषु निदर्शनेषु एकत्र २६ अधिकसांकेतिकाक्षराणि न लब्धानि । अस्याः लिपेः आविष्कारनिमित्तं बहुशोधकार्याणि अभवन् । परन्तु विद्वत्सु लिपेः आविष्करणविषये मतैक्यताऽभावः एव दृश्यते । १८७३ तमे वर्षे अलेक्जन्डर कानिंहाम् प्रथमवारं सिन्धुलिप्यां उत्कलितमुद्रां प्रकाशितवान् । तदनन्तरं प्रायः ४००० सांकेतिकचिह्नसमन्वितानि वस्तुनि शोधखननात् प्राप्तानि । सिन्धुलिपेः लेखनगतिः वामतः, दक्षिणतः तथा उभयतः आसीत् । सिन्धुलिपेः प्रायः ४००-६०० मौलिकसांकेतिकचिह्नानि सन्ति । अनेके लिपिविशेषज्ञाः मन्यन्ते यत्- लिपेः स्वरूपम् संश्लेषात्मकभाषां सूचयति इति ।

# Unit III

## Sentence construction

Student's skill in constructing a grammatically correct sentence is to be developed and assessed. For this the students may be asked to translate.

## Verbs and its meanings

1. भू् - Be
2. अर्च् - Worship
3. क्रीड् - Play
4. चल् - Move
5. दृश् - See
6. नम् - Salute
7. पठ् - Read
8. पत् - Fall
9. रक्ष् - Protect
10. हस् - Laugh

1. सः - He
2. तौ - They Two
3. ते - They All

4. त्वम् - You

5. युवाम् - You Two

6. यूयम् - You All

7. अहम् - I

8. आवाम् - We Two

9. वयम् - We All

| | |
|---|---|
| **1.** अध्यापकः कदा आगच्छति ? | When does the teacher come ? |
| **2.** त्वं कुत्र गच्छसि ? | Where do you go ? |
| **3.** सूर्यः कदा उदेति ? | When does the sun rise ? |
| **4.** मन्दिरं कुत्र अस्ति ? | Where is the temple ? |
| **5.** आरक्षकः चोरं ताडयति। | The policeman beats the thief. |
| **6.** शिष्यः प्रश्नं पृच्छति। | The disciple asks a question. |
| **7.** वैद्यः औषधं यच्छति। | The doctor gives medicine |
| **8.** गायिका गीतं गायति। | The singer sings a song. |
| **9.** सीता वनं गच्छति। | Sita goes to forest. |
| **10.** छात्रः उत्तराणि स्मरति। | The student remembers the |

answers.

11. भक्तः देवतां नमति। The devotee worships the Lord.

12. बालिका परमेश्वरम् अभ्यर्चेति। Girl worships the lord.

13. बालकः विद्यालयात् आगच्छति। Boy comes from the school.

14. सा जलम् अपनयति। She takes away water.

15. सः भवनं प्रविशति। He enters the house.

## Translations

1. अस्ति वरुणाद्रिसमीपे एकस्मिन् प्रदेशे परिणतवया मन्दविषो नाम कृष्णसर्पः । स एवं चित्ते सञ्जिन्तितवान् -- "कथं नाम मया सुखोपायवृत्त्या वर्तितवयम्" इति। ततो बहुमण्डूकं ह्रदमुपगम्याधृतिपरीतमिवात्मानं दर्शितवान्। अथ तथास्थिते तस्मिन्नुदकप्रान्तगतेनैकेन मण्डूकेन पृष्टः -- "माम ! किमद्य यथापूर्वमाहारार्थं न विहरसि ?"

In the region of the Varunaadri mountain lived an old snake by the name of Mandvish. One day he was wondering if there could be a way so that he can live life without making much effort. He reached upon an idea and then went to a lake full of frogs and moved about hither and thither restlessly. Watching him thus, a frog sitting near the lake asked "Uncle! You are not busy looking for food as you have been in the past?"

**2.** कस्मिंश्चिदुद्देशे सिंहदम्पति प्रतिवसतः स्म । अथ सिंही पुत्रद्वयमजीजनत् सिंहोऽपि नित्यमेव मृगान् व्यापाद्य सिंह्ये ददाति । अथान्यस्मिन्नहनि तेन किमपि नासादितम् । वने भ्रमतोऽपि तस्य रविरस्तं गतः । अथ तेन स्वगृहमागच्छता श्रृगाल शिशुः प्राप्तः । स च बालकोऽयमित्यवधार्य, यत्नेन दंष्ट्रामध्यगतं कृत्वा सिंह्यौ जीवन्तमेव समर्पितवान् । ततः सिंह्यभिहितं -- "भो कान्त ! त्वयानीतं किंञ्चिदस्माकं भोजनम् ?" । सिंह आह -- "प्रिये ! मयाद्यैनं श्रृगालशिशु परितज्य न किञ्चित्सत्त्वमासादितम् । स च मया बालोऽयमिति मत्वा न व्यापादितो विशेषात्स्वजातीयश्च ।

In a forest a lion couple were living. After this the lioness gave birth to sons, hence the lion used to haunt animals and give lioness. One day no animal was caught by him. While roaming in the forest it became evening. On way back home a baby-jackal was got by him. He without killing the baby, carefully carried it and gave to the lioness in living condition. The lioness asked, "Dear, have you brought something for me to eat?". The lion replied, "Dear, except for this baby jackal I could not find any animal. Since he is small, and I thought, like our small children, I did not kill it.

**3.** अस्ति कस्मिश्चिज्जलाशये कम्बुग्रीवो नाम कच्छपः । तस्य च सङ्कटविकटनाम्नी मित्रे हंसजातीये परमस्नेहकोटिमाश्रिते, नित्यमेव सरस्तीरमासाद्य तेन सहानेकदेवर्षिमहर्षीणां कथाः कृत्वास्तमनवेलायां स्वनीडसंश्रयं कुरुतः । अथ गच्छता कालेनानावृष्टिवशात्सरः शनैः शनैः शोषमगमत् । ततस्तद् दुःखदुखितौ तावूचतु -- "भो मित्र! जम्बालशेषमेतत्सरः सञ्जातं, तत्कथं भवान्भविष्यतीति व्याकुलत्वं नो हृदि वर्तते ।" तच्छ्रुत्वा कम्बुग्रीव आह -- "भो ! साम्प्रतं नास्त्यस्माकं जीवितव्यं जलाभावात् । तथाप्युपायश्चिन्त्यतामिति

In a lake there lived a tortoise named Kambugreeva. Two swans, named Sankat and Vikat were his very close friends. Everyday the three would sit by the lake and talk about various devarshi, maharshi and so on, and when the sun set they would return to their homes. After some days, because of lack of rain, the lake slowly started to dry up. The tortoise was very sad and worried. Seeing him the swans said "Friend! This lake has dried up. Now only swampy mud remains. Without water how shall we live? This thought is worrying us." On hearing the swans, the tortoise said - "Now, due to the lack of water, my survival is not possible. Yet, you two should think about saving me.

**4.** अस्ति कस्मिंश्चिद्वनप्रदेशे नानाजलचरसनाथं महत्सरः । तत्र च कृताश्रयो बक एको वृद्धभावमुपगतो मत्स्यान् व्यापादयितुमसमर्थः । ततश्च क्षुत्क्षामकण्ठः सरस्तीर उपविष्टो मुक्ताफलप्रकरसदृशैरश्रुप्रवाहैर्धरातलमभिषिञ्चन् रूरोद । एकः कुलीरको नानाजलचरसमेतः समेत्य तस्य दुःखेन दुःखितः सादरमिदमूचे -- "माम ! किमद्य त्वया नाहारवृत्तिरनुष्ठीयते । केवलमश्रुपूर्णनेत्राभ्यां स निःश्वासेन स्थीयते ।" स आह -- "वत्स सत्यमुपलक्षितं भवता, मया हि मत्स्यादनं प्रति परमवैराग्यतया सांप्रतं प्रायोपवेशनं कृतम् , तेनाहं समीपगतानपि मत्स्यान्न भक्षयामि ।"

In a forest there was a lake in which lived many marine creatures. One of its residents was an old stork who was no longer capable of killing fish. Hence, one day, oppressed by hunger he sat on the bank of the lake copiously shedding tears enough to irrigate the land. A crab alongwith some marine animals were pained to see the weeping stork. The crab asked him -- "My dear, you have not

made any arrangement for your meal today, you have only been shedding tears and sitting quietly, what is the matter?

**5.** अस्ति कस्मिंश्चिद्वनोद्देशे बहुबकसनाथो वटपादपः । तस्य कोटरे कृष्णसर्पः प्रतिवसति स्मः । स च बकबालकानजातपक्षानपि सदैव भक्षयन् कालं नयति स्मः । अथैको बकस्तेन भक्षितान्यपत्यानि दृष्ट्वा शिशुवैराग्यात्सरस्तीरमासाद्य वाष्पपूरितनयनोऽधोमुखस्तिष्ठति । तञ्च तादृक्चेष्टितमवलोक्य कुलीरकः प्रोवाच -- "माम! किमोवं रुद्यते भवताद्य ? स आह -- "भद्र! किं करोमि ? मम मन्दभाग्यस्य बालकाः कोटरनिवासिना सर्पेण भक्षिताः । तद् दुःखदुःखितो रोदिमि । तत्कथय मे यद्यस्ति कश्चिदुपायस्तद्विनाशाय । तदाकर्ण्य कुलीरकश्चिन्तयामास -- "अयं तावदस्मज्जातिसहजवैरी।अतस्तत्तथा सत्यानृतमुपदेशं प्रयच्छामि, यथान्येऽपि सर्वे बकाः सक्षयमायान्ति ।"

In a forest there was a banyan tree in which lived many families of storks. A snake lived in the hollow of that tree. The snake would kill and eat the young and newborn storks and live happily. One day, on seeing the young ones being consumed by the snake, and in great grief over the dead children, the stork went to a lake and with tears in his eyes sat there sadly. Seeing the stork in such melancholy, a crab asked, "Dear Sir. Why are you crying thus, today?" On hearing the crab, the stork said, "Dear! what am I to do? My unfortunate children have been eaten by the snake that lives in the hollow of the tree. Can you tell me of some way to destroy the snake?" The crab thought, "The stork is a sworn enemy of us crabs. Hence, I will cleverly suggest something that will destroy all the storks."

വെള്ളം ജടാന്തേ ബിഭ്രാണം വെള്ളിമാമലവിഗ്രഹം

വെള്ളുരമർന്ന ഗൗരീശമുള്ളിലൻപൊടു ചിന്തയേ

കർത്തുകർമ്മക്രിയാഭേദംവിഭക്ത്യർത്ഥാന്തരങ്ങളും

ഭാഷയായിഹ ചൊല്ലുന്നേൻ ബാലന്മാരറിവാഹം.

ശബ്ദം രണ്ടുവിധം പ്രോക്തം തിങന്തം ച സുബന്തവും

രണ്ടു ജാതി സുബന്തേ ചാപ്യജന്തം ച ഹലന്തവും.

ലിംഗം മുമ്മൂന്നു രണ്ടിന്നും വരും പുല്ലിംഗമാദിയിൽ

സ്ത്രീലിംഗം മദ്ധ്യഭാഗേ സ്യാദൊടുക്കത്തു നപുംസകം

വൃക്ഷോ ജായാ കുണ്ഡമിതി രൂപഭേദമജന്തകേ,

ഗോധുക് പൂർവ്വമുപാനച്ച വാർശ്ശബ്ദോऽപി ഹലന്തകേ.

പ്രഥമേകാർത്ഥവചനം നോക്കിയന്തം ഗ്രഹിക്കുക

അജന്തുഷു, ഹലന്തേഷു ബഹ്വർത്ഥവചനങ്ങളാൽ.

അകാരാന്താദിയായുള്ള ശബ്ദങ്ങൾക്കു യഥോചിതം
വിഭക്തിഭേദാദർത്ഥങ്ങൾ ചൊല്ലുന്നു പലജാതിയും.

പ്രഥമാ ച ദ്വിതീയാ ച തൃതീയാ ച ചതുർത്ഥ്യപി

പഞ്ചമി, ഷഷ്ഠിയും സപ്തമേവമേഴു വിഭക്തികൾ

ഇവറ്റിന്നിഹ വെവ്വേറെ മുമ്മൂന്നു വചനം വരും.

ഏക-ദ്വി-ബഹു മുൻപായി വചനം മൂന്നിവ ക്രമാത്.

ഒരുത്തനിവർ പിന്നെ പലരെന്നർത്ഥമായ് വരും

പ്രഥമായാ ഭേദമത്രേ മുറ്റും സംബോധനാഭിധാ.

അതെന്നു പ്രഥമയ്ക്കർത്ഥം, ദ്വിതീയയ്ക്കതിനെപ്പുന:
അതിനോടതിലേയ്ക്കെന്നും ദ്വിതീയയ്ക്കർത്ഥമായ് വരും.

തൃതീയാ ഹേതുവായിട്ടു കൊണ്ടാലോടൂടെയെന്നപി

ആയിക്കൊണ്ടു ചതുർത്ഥീ ച സർവ്വത്ര പരികീർത്തിതാ.

അതിൽനിന്നതിനെക്കാളും ഹേതുവായിട്ടു പഞ്ചമീ

ഇക്കുമിന്നുമുടേ ഷഷ്ഠിക്കതിന്റെ വച്ചുമെന്നപി.

അതിങ്കലതിൽവച്ചെന്നും വിഷയം സപ്തമീ മതാ
വിഭക്ത്യർത്ഥങ്ങളീവണ്ണം ചൊല്ലുന്നു പല ജാതിയും.

വൃക്ഷസ്തിഷ്ഠത്യസൗ (വൃക്ഷം നില്ക്കുന്നു),

വൃക്ഷമാശ്രയേ (വൃക്ഷത്തെയാശ്രയിക്കുന്നേൻ),

വൃക്ഷേണ ദ്വിരദോ ഹത: (വൃക്ഷത്താലാനകൊല്ലപ്പെട്ടെ)

ന്നീവണ്ണം തൃതീയയും

നമശ്ചകാര വൃക്ഷായ ശാഖാസംരുദ്ധഭാസ്വതേ

(നമസ്കരിച്ചേൻ വൃക്ഷത്തിന്നായിക്കൊണ്ടു) ചതുർത്ഥ്യപി.

വൃക്ഷാഗ്രാത് കുസുമം ഭ്രഷ്ടം (വൃക്ഷാഗത്തിൽ നിന്നഥ പൂവീണ)ന്നഥ,

വൃക്ഷസ്യ ശാഖാ ചാത്യന്തമുന്നതാ

(വൃക്ഷത്തിന്റെ കൊമ്പുമേറ്റമുയർന്നെ)ന്നതു ഷഷ്ഠ്യപി

പക്ഷീ വൃക്ഷേ സ്ഥിത: (പക്ഷി വൃക്ഷത്തിങ്കലിരുന്നിതു)

ഹേ വൃക്ഷ! ത്വം കമ്പസേ കിമിതി സംബോധനാപി ച

(എടോ വൃക്ഷം! നീ ചലിക്കുന്നെന്തിനീവണ്ണമൊക്കവേ)
സംബോധനാനിർണ്ണയാർത്ഥം ഹേ ശബ്ദം കൂടെയുച്യതേ

പദച്ഛേദം ചെയ്മുമ്പേ വിഭക്തികളറിഞ്ഞുടൻ

അങ്ങുമിങ്ങുമിരിക്കുന്ന പദങ്ങളെ യഥോചിതം

ചേരുന്നപടിചേർക്കുന്നതന്വയം പരികീർത്തിതം കർത്താ,

കർമ്മം, കിയാ മൂന്നുമന്വയത്തിങ്കൽ മുമ്പിവ

കർത്താ ചെയ്യുന്നവൻ,കർമ്മമവനിച്ഛിച്ചതായ് വരും. കർത്താവിന്നിഹ കർമ്മത്തോടുള്ള ബന്ധം ക്രിയാപദം

കർത്താ പ്രഥമയാകുമ്പോൾ ദ്വിതീയാ കർമ്മമായ് വരും

തിങന്തം ക്രിയയായീടും ചിലേടത്തു സുബന്തവും

തൃതീയാകർത്താവാകുമ്പോൾ കർമ്മം പ്രഥമയായി വരും

സുബന്തം വാ തിങന്തം വാ കിയാ തതാത്മനേ പദം

തൃതീയ കർത്താവായിടും ഭാവേ കർമ്മങ്ങളില്ല പോൽ കർത്താവിലഥ കർമ്മത്തിലഥ ഭാവത്തിലും തഥാ

മൂന്നുജാതിവരും ത്രത ചൊല്ലാം കർത്താവിലുള്ളതി

കിരാതോ ഹരിണം ജഘ്നേ. കർത്തകർമ്മകിയാ: കമാത്

(കിരാതൻ മാനിനെക്കൊന്നു).

കിരാതേന മൃഗോ ഹത: (കിരാതനാൽ മൃഗം കൊല്ലപ്പെട്ടു)

വെന്നതു കർമ്മണി

താമ്രചൂഡൈരകൂജത (നൽപൂങ്കോഴികളാലിഹ്
കൂവുണ്ടെന്നുള്ളതുണ്ടായി) ഭാവത്തിങ്കലിവണ്ണമാം.

കാണുന്നിതകവചനം ഭാവത്തിങ്കൽ ക്രിയാപദം സുബന്തം
ക്രിയയാകുമ്പോൾ ഭാവത്തിങ്കൽ നപുംസകം.

വിശേഷണവിശേഷ്യങ്ങളറിഞ്ഞീടുക സർവ്വത:

വിശേഷ്യം തു പ്രധാനം സ്യാദപ്രധാനം വിശേഷണം.

വിശേഷ്യം ബ്രഹ്മചാരീ തു മേഖലാജിനദണ്ഡവാൻ

(മേഖലാജിനദണ്ഡങ്ങളുള്ളവൻ) തദ്വിശേഷണം.

ഗോപാലോ ഗാം പയോ ദോഗ്ധി എന്നീവണ്ണം ദ്വികർമ്മകം
(ഗോപാലൻ പശുവെ പാലെ കറക്കുന്നി) പ്രകാരമാം

സൂര്യേ കർക്കിസ്ഥിതേ നാരീ പ്രസൂയത കിലാത്മജാം.

(സൂര്യൻ കർക്കടകേ നിൽക്കും വിഷയത്തിങ്കലംഗനാ

പെറ്റുപോൽ മകനെ) ചൊന്നനേവം വിഷയസപ്തമീ

ക്രിയാവിശേഷണം ചൊല്ലാം, രാമ: സാദരമബ്രവീത്

(ശ്രീരാമനാദരത്തോടു കൂടുംവണ്ണം പറഞ്ഞിത്)

ധാതു രണ്ടു വിധം പ്രോക്തം സകർമ്മകമകർമ്മകം

കൃഷ്ണോ ദിദേവ (ശ്രീകൃഷ്ണൻ ക്രീഡിച്ചെന്നതകർമ്മകം.

ശ്രീകൃഷ്ണോऽപാലയ ഗാഃ (കൃഷ്ണൻ പാലിച്ചു ഗോക്കളെ)
സകർമ്മകമിദം പ്രോക്തം; തിങന്താംശ്ച ബവിമൃഹം

ലട്ടും ലങ്ങും ലോട്ടും ലിങ്ങും ലിട്ടും ലുങ്ങും തഥൈവ ച

ലുട്ടും ലൃങ്ങും ലൃട്ടും ലേട്ടും ലകാരാ: പത്തിവ കമാത്

ആശീർലിങ് ലിങ്ങിലേ ഭേദം കാലഭേദമഥോച്യതേ
ലഡ്വർത്തമാനകാലത്തിൽ ഭൂതേ ലുങ് ലങ് ലിടസ്തഥാ

വിധ്യനുജ്ഞാദ്യർത്ഥഭേദേ ലിങ്ങുലുട്ടുകളും വരും.

ലുട്ടും ലൃട്ടും ഭാവികാലം കാണിപ്പൂ, ലൃങ്ങ് ലകാരവും,
കിയയുണ്ടാവതില്ലെന്നൊരർഥം തോന്നുന്നതാകിലോ

കാര്യകാരണഭാവത്തിൽ ഭൂതഭാവികളിൽ വരും

ആശംസാർത്ഥം കുറിച്ചീടാൻ ആശീർലിങ്ങ് കണ്ടുകൊൾകെടോ

നാനാധാതുഗണത്തിന്റെ മേൽ വരുന്നു ലഡാദയ:

ഭൂ സത്തായാമേധ വൃദ്ധ ഡുപചഷ്പാക ഏ്വവ ച

ലകാരത്തിന്നു രൂപങ്ങളീരണ്ടാം ധാതുഭേദത്:

പരസ്മൈപദവും പിന്നെ ആത്മനേപദവും തഥാ.

ഓരോന്നാകിലുമാം പിന്നെ ചിലേടത്തു യഥാവിധി

ഓരോന്നിന്നിഹ വെവ്വേറെ വർഗ്ഗം മുമ്മൂന്നു വന്നിടും.

പ്രഥമഃ പുരുഷഃ പൂർവ്വം മദ്ധ്യമഃ പുരുഷഃ പുന:

ഉത്തമ: 'പുരുഷയേതി വർഗ്ഗം മൂന്നിവ രണ്ടിലും.

ഓരോന്നിന്നിഹ വെവ്വേറെ മുമ്മൂന്നുവചനം വരും.

ഏ്യക-ദ്വി-ബഹു മുൻപായി വചനം മൂന്നിവ ക്രമാത്

ഉത്തമൻ വരുമേടത്തങ്ങസ്മത്തുക്കൾ വരുന്നിതു

മറ്റുള്ളടത്തു പ്രഥമപുരുഷൻ വരുമെപ്പൊഴും.

സ കരോതി ത്വം കരോഷി കരാമ്യഹമിതി കമാത്

അവൻ ചെയ്യുന്നു നീ ചെയ്യുന്നു ഞാൻ ചെയ്യുന്നിതി ക്രമാത്.

കുർവന്തി തേ, തൗ കുരുതഃ, സ കരോതി യഥാക്രമം.

തന്റെ തന്റെ സമത്തോടു കൂടുമത വിഭക്തികൾ.

വചനങ്ങളുമവ്വണ്ണം തഥാ ലിംഗങ്ങളും വരും.

കൃഷ്ണ: കമലപത്രാക്ഷഃ,കൃഷ്ണം കമലലോചനം,

കൃഷ്ണേന വാസുദേവേന, കൃഷ്ണായ പരമാത്മനേ,

കൃഷ്ണാത് കമലാതാക്ഷാത്, കൃഷ്ണസ്യ കമലാപതേഃ

കൃഷ്ണേ കമലപത്രാക്ഷേ, ഹേ കൃഷ്ണ പുരുഷോത്തമ.

കൃഷ്ണ: കമലപത്രാക്ഷാഃകൃഷണൌ കമലലോചന,

കൃഷ്ണാ : കമലപത്രാക്ഷാ: വചനങ്ങളിവണ്ണമാം.

വൃക്ഷ: കുസുമിതം, കാന്താ പൂർണ്ണചന്ദ്രനിഭാനനാ,

വനം കുസുമിതം ഭാതി - ലിംഗഭങ്ങളിങ്ങനെ.

യച്ഛബ്ദം കാണുമേടത്തു തച്ഛബ്ദം കൂടെവന്നിടും.

ക്രിയാപദം രണ്ടുമൂന്നു കാണുന്നേടത്തിവണ്ണമാം.

ക്രിയക്കടുത്തു കർത്താവും കർമ്മവും തത്ര കേൾവിത്

ദ്വിതീയക്കും സപ്തമിക്കും പിമ്പേ ക്ത്വാന്തം ല്യബന്തവും.

തത് ഗത്വാ പ്രവിശ്യേതി, തം ദൃഷ്ട്വാ പക്ഷ്യ ചേത്യപി

രണ്ടു കർമ്മങ്ങളുണ്ടാകിൽ നടുവേ സ്യാത് ല്യബന്തവും.

വിദർഭവിഷയം പ്രാപ്യ രുഗ്മിണീമഹരത് പ്രഭു:

പ്രാപ്യ സംഗമ്യ സൽകൃത്യ പ്രേക്ഷ്യത്യാദി ല്യബന്തവും.

ക്ത്വാന്താ: കൃത്വാ ച ഹത്വാ ച നത്വാ ഗത്വാദികാസ്തഥാ.

നത്വാ (നമസ്കരിച്ചിട്ട്) വീക്ഷ്യ (കണ്ടിട്ടി) തീദൃശം.

വക്തും ശ്രോതും ഗ്രഹീതും വാ തുമുന്നന്തങ്ങളേവമാം

ചതുർത്ഥ്യർത്ഥമിവറ്റിന്നും തസിലന്തം യതസ്തതഃ

രാജതോ വിപ്രതശ്ചേതി പഞ്ചമ്യർത്ഥമിവറ്റിനും

കുർവൻ, കുർവാണയിത്യ്യവം ശത്രന്തം ശാനജന്തവും.

ചെയ്തിയങ്ങുന്നുവേന്നേവമർത്ഥഭേദമുദീരിതം.

അവ്യയങ്ങളഥോച്യന്തേ ക്ത്വാന്താശ്ചൈവ ല്യബന്തകാ:

തസിലന്താസ്തമുന്നന്താ: ശനൈരുച്ചൈസ്തഥാധുനാ

അഥാധോ തദനു ക്ഷിപ്രം യർഹി തർഹി ച കർഹിചിത്.

യദി ചേത് ബത ഹന്തേതി തു ഹി ച സ്മ ഹ വൈ പുന:

യദാ തദാ കദാ ഭൂയ: പ്രായ: ശശ്വത് സ്ഫുടം ദ്രുതം.

അഹോ പൃഥഗ് വൃഥാ ശീഘ്രം തത്ര യത്രാത്ര കുത്രചിത്.

ഇത്ഥം നനു ധ്രുവം ചിതമപി ഖല്വേവമേവ നു,

യഥാ തഥാ കഥം നാ ചിച്ഛനാന്താദികാ: ക്രമാത്

കർത്താവിൽ ക്രിയയാകുമ്പോൾ കർത്താ പ്രഥമയായ് വരും.

കർമ്മം ദ്വിതീയയായീടും രക്ഷിത്വസ്മാൻ മഹേശ്വര:

കർമ്മത്തിൽ ക്രിയയാകുമ്പോൾ കർത്താവങ്ങു തൃതീയയാം

കർമ്മം പ്രഥമയായീടും കൃഷ്ണേനാധാരി പർവത:

ഭാവത്തിൽ ക്രിയയാകുമ്പോൾ കർത്താവങ്ങു തൃതീയയാം.

കർമ്മമില്ലെന്നു കാണേണം കൃഷ്ണേനാഭാവി ഗോകുലേ.

കർത്തര്യേവ പരസ്മൈപദമിതി

ന ച ഭാവകർമ്മണോർജ്ഞയം.

തിഷ്വാത്മനേപദം സ്യാദ് ഭാവേ പ്രഥമൈകവചനമേവ പുന:

സുബന്തം ക്രിയ ചൊല്ലുന്നേൻ ബഭൂവാൻ ഭുതവാനഥ

ഭൂതോ ഭവ്യത്വധനീയോ ഭവിതവ്യ ഇതി ത്രിഷു

പൂർവകാലക്രിയാത്വേത്വാ: കൃത്വാ പാപ്യ വിധായ ച

പായം പായം ശനൈ; കാരമപി കർത്തും പ്രയോജനം.

ഔചിത്യം കൊണ്ടറിഞ്ഞീടുകർത്ഥഭേദങ്ങളൊക്കവേ

നവാരണ്യമഹീദേവകൃതിരേഷാ വിരാജതേ.

ഇതി ബാലപ്രബോധനം സമാപ്തം.

## श्रीरामोदन्तम्

॥ अथ बालकाण्डः ॥

श्रीपतिं प्रणिपत्याहं श्रीवत्साङ्कितवक्षसम् ।

श्रीरामोदन्तमाख्यास्ये श्रीवाल्मीकिप्रकीर्तितम् ॥१॥

पुरा विश्रवसः पुत्रो रावणो नाम राक्षसः ।

आसीदस्यानुजौ चास्तां कुम्भकर्णविभीषणौ ॥ २॥

ते तु तीव्रेण तपसा प्रत्यक्षीकृत्य वेधसम् ।

वव्रिरे च वरानिष्टानस्मादाश्रितवत्सलात् ॥३॥

रावणो मानुषादन्यैरवध्यत्वं तथानुजः ।

निर्देवत्वेच्छया निद्रां कुम्भकर्णोऽवृणीत च ॥ ४॥

विभीषणो विष्णुभक्तिं वव्रे सत्त्वगुणान्वितः ।

तेभ्य एतान्वरान्दत्त्वा तत्रैवान्तर्दधे प्रभुः ॥ ५॥

रावणस्तु ततो गत्वा रणे जित्वा धनाधिपम् ।

लङ्कापुरीं पुष्पकं च हृत्वा तत्रावसत्सुखम् ॥ ६॥

यातुधानास्ततः सर्वे रसातलनिवासिनः ।

दशाननं समाश्रित्य लङ्कायां सुखमावसन् ॥७॥

मन्दोदरीं मयसुतां परिणीय दशाननः ।

तस्यामुत्पादयामास मेघनादाह्वयं सुतम् ॥८॥

रसां रसातलं चैव विजित्य स तु रावणः ।

लोकानाक्रमयन् सर्वाञ्जहार च विलासिनीः ॥ ९॥

दूषयन्वैदिकं कर्म द्विजानर्दयति स्म सः ।

आत्मजेनान्वितो युद्धे वासवं चाप्यपीडयत् ॥१०॥

तदीयतरुरत्नानि पुनरानाय्य किङ्करैः ।

स्थापयित्वा तु लङ्कायामवसच्च चिराय सः ॥ ११॥

ततस्तस्मिन्नवसरे विधातारं दिवौकसः ।

उपगम्योचिरे सर्वं रावणस्य विचेष्टितम् ॥१२॥

तदाकर्ण्य सुरैः साकं प्राप्य दुग्धोदधेस्तटम् ।

तुष्टाव च हृषीकेशं विधाता विविधैः स्तवैः ॥ १३॥

आविर्भूयाथ दैत्यारिः पप्रच्छ च पितामहम् ।

किमर्थमागतोऽसि त्वं साकं देवगणैरिति ॥ १४॥

ततो दशाननात्पीडामजस्तस्मै न्यवेदयत् ।

तच्छ्रुत्वोवाच धातारं हर्षयन्विष्टरश्रवाः ॥ १५॥

अलं भयेनात्मयोने गच्छ देवगणैः सह ।

अहं दाशरथिर्भूत्वा हनिष्यामि दशाननम् ॥१६॥

आत्मांशैश्च सुराः सर्वे भूमौ वानररूपिणः ।

जायेरन्मम साहाय्यं कर्तुं रावणनिग्रहे ॥ १७॥

एवमुक्त्वा विधातारं तत्रैवान्तर्दधे प्रभुः ।

पद्मयोनिस्तु गीर्वाणैः समं प्रायात्प्रहृष्टधीः ॥ १८॥

अजीजनत्ततः शक्रो वालिनं नाम वानरम् ।वानरम्

सुग्रीवमपि मार्ताण्डो हनुमन्तं च मारुतः ॥ १९॥

पुरैव जनयामास जाम्बवन्तं च पद्मजः ।

एवमन्ये च विबुधाः कपीनजनयन्बहून् ॥२०॥

ततो वानरसङ्घानां वाली परिवृढोऽभवत् ।

अमीभिरखिलैः साकं किष्किन्धामध्युवास च ॥ २१॥

आसीद्दशरथो नाम सूर्यवंशेऽथ पार्थिवः ।

भार्यास्तिस्रोऽपि लब्ध्वासौ तासु लेभे न सन्ततिम् ॥२२॥

ततः सुमन्त्रवचनादृष्यशृङ्गं स भूपतिः ।

आनीय पुत्रकामेष्टिमारेभे सपुरोहितः ॥ २३॥

अथाग्नेरुत्थितः कश्चिद्गृहीत्वा पायसं चरुम् ।

एतत्प्राशय पत्नीस्त्वमित्युक्त्वाऽदान्नृपाय सः ॥ २४॥

तद्गृहीत्वातद्गृहीत्वा तदैवासौ पत्नीः प्राशयदुत्सुकः ।

ताश्च तत्प्राशनादेव नृपाद्गर्भमधारयन् ॥२५॥

पूर्णे कालेऽथ कौसल्या सज्जनाम्भोजभास्करम् ।

अजीजनद्रामचन्द्रं कैकेयी भरतं तथा ॥ २६॥

ततो लक्ष्मणशत्रुघ्नौ सुमित्राजीजनत्सुतौ ।

अकारयत्पिता तेषां जातकर्मादिकं द्विजैः ॥ २७॥

ततो ववृधिरेऽन्योन्यं स्निग्धाश्चत्वार एव ते ।

सकलासु च विद्यासु नैपुण्यमभिलेभिरे ॥ २८॥

ततः कदाचिदागत्य विश्वामित्रो महामुनिः ।

ययाचे यज्ञरक्षार्थं रामं शक्तिधरोपमम् ॥२९॥

वसिष्ठवचनाद्रामं लक्ष्मणेन समन्वितम् ।

कृच्छ्रेण नृपतिस्तस्य कौशिकस्य करे ददौ ॥ ३०॥

तौ गृहीत्वा ततो गच्छन्बलामतिबलां तथा ।

अस्त्राणि च समग्राणि ताभ्यामुपदिदेश सः ॥ ३१॥

गच्छन्सहानुजो रामः कौशिकेन प्रचोदितः ।

ताटकामवधीद्धीमान् लोकपीडनतत्पराम् ॥३२॥

ततः सिद्धाश्रमं प्राप्य कौशिकः सहराघवः ।

अध्वरं च समारेभे राक्षसाश्च समागमन् ॥३३॥

राघवस्तु ततोऽस्त्रेण क्षिप्त्वा मारीचमर्णवे ।

सुबाहुप्रमुखान् हत्वा यज्ञं चापालयन्मुनेः ॥ ३४॥

कौशिकेन ततो रामो नीयमानः सहानुजः ।

अहल्याशापनिर्मोक्षं कृत्वा सम्प्राप मैथिलम् ॥३५॥

जनकेनार्चितो रामः कौशिकेन प्रचोदितः ।

सीतानिमित्तमानीतं बभञ्ज धनुरैश्वरम् ॥३६॥

ततो दशरथं दूतैरानाय्य मिथिलाधिपः ।

रामादिभ्यस्तत्सुतेभ्यः सीताद्याः कन्यका ददौ ॥ ३७॥

ततो गुरुनियोगेन कृतोद्वाहः सहानुजः ।

राघवो निर्ययौ तेन जनकेनोरु मानितः ॥ ३८॥

तदाकर्ण्य धनुर्भङ्गमायान्तं रोषभीषणम् ।

विजित्य भार्गवं राममयोध्यां प्राप राघवः ॥ ३९॥

ततः सर्वजनानन्दं कुर्वाणश्चेष्टितैः स्वकैः ।

तामध्युवास काकुत्स्थः सीतया सहितः सुखम् ॥४०॥

॥ इति श्रीरामोदन्ते बालकाण्डः समाप्तः ॥

॥ अथ अयोध्याकाण्डः ॥

एतस्मिन्नन्तरे गेहं मातुलस्य युधाजितः ।

प्रययौ भरतः प्रीतः शत्रुघ्नेन समन्वितः ॥ १॥

ततः प्रकृतिभिः साकं मन्त्रयित्वा स भूपतिः ।

अभिषेकाय रामस्य समारेभे मुदान्वितः ॥ २॥

कैकेयी तु महीपालं मन्थरादूषिताशया ।

वरद्वयं पुरा दत्तं ययाचे सत्यसङ्गरम् ॥३॥

वनवासाय रामस्य राज्याप्त्यै भरतस्य च ।

तस्या वरद्वयं कृच्छ्रमनुजज्ञे महीपतिः ॥ ४॥

रामं तदैव कैकेयी वनवासाय चादिशत् ।

अनुज्ञाप्य गुरून्सर्वान्निर्ययौ च वनाय सः ॥ ५॥

दृष्ट्वा तं निर्गतं सीता लक्ष्मणश्चानुजग्मतुः ।

सन्त्यज्य स्वगृहान्सर्वे पौराश्चानुययुर्द्रुतम् ॥६॥

वञ्चयित्वा तु तान्पौरान्निद्राणान्निशि राघवः ।

वाह्यमानं सुमन्त्रेण रथमारुह्य चागमत् ॥॥

श्रिङ्गिबेरपुरं गत्वा गङ्गाकूलेऽथ राघवः ।

गुहेन सत्कृतस्तत्र निशामेकामुवास च ॥ ८॥

सारथिं संनिमन्त्र्यासौ सीतालक्ष्मणसंयुतः ।

गुहेनानीतया नावा सन्ततार च जाह्नवीम् ॥९॥

भरद्वाजमुनिं प्राप्य तं नत्वा तेन सत्कृतः ।

राघवस्तस्य निर्देशाच्चित्रकूटेऽवसत्सुखम् ॥१०॥

अयोध्यां तु ततो गत्वा सुमन्त्रः शोकविह्वलः ।

राज्ञे न्यवेदयत्सर्वं राघवस्य विचेष्टितम् ॥११॥

तदाकर्ण्य सुमन्त्रोक्तं राजा दुःखविमूढधीः ।

रामरामेति विलपन्देहं त्यक्त्वा दिवं ययौ ॥ १२॥

मन्त्रिणस्तु वसिष्ठोक्त्या देहं संरक्ष्य भूपतेः ।

दूतैरानाययन् क्षिप्रं क्षिप्रंभरतं मातुलालयात् ॥१३॥

भरतस्तु मृतं श्रुत्वा पितरं कैकयीगिरा ।

संस्कारादि चकारास्य यथाविधि सहानुजः ॥ १४॥

अमात्यैश्चोद्यमानोऽपि राज्याय भरतस्तदा ।

वनायैव ययौ राममानेतुं नागरैः सह ॥ १५॥

स गत्वा चित्रकूटस्थं रामं चीरजटाधरम् ।

ययाचे रक्षितुं राज्यं वसिष्ठाद्यैर्द्विजैः सह ॥ १६॥

चतुर्दश समा नीत्वा पुनरेष्याम्यहं पुरीम् ।

इत्युक्त्वा पादुके दत्त्वा तं रामः प्रत्ययापयत् ॥१७॥

गृहीत्वा पादुके तस्माद्भरतो दीनमानसः ।

नन्दिग्रामे स्थितस्ताभ्यां ररक्ष च वसुन्धराम् ॥१८॥

राघवस्तु गिरेस्तस्माद्गत्वाऽत्रिं समवन्दत ।

तत्पत्नी तु तदा सीतां भूषणैः स्वैरभूषयत् ॥१९॥

उषित्वा तु निशामेकामश्रमे तस्य राघवः ।

विवेश दण्डकारण्यं सीतालक्ष्मणसंयुतः ॥ २०॥

॥ इति श्रीरामोदन्ते अयोध्याकाण्डः समाप्तः ॥

॥ अथ आरण्यकाण्डः ॥

व्रजन्वनेन काकुत्स्थो विराधं विधिचोदितम् ।

सदारानुजमात्मानं हरन्तमवधीत्तदा ॥ १॥

शरभङ्गाश्रमं प्राप्य स्वर्गतिं तस्य वीक्ष्य सः ।

प्रतिजज्ञे राक्षसानां वधं मुनिभिरर्थितः ॥ २॥

तस्माद्गत्वा सुतीक्ष्णं च प्रणम्यानेन पूजितः ।

अगस्त्यस्याश्रमं प्राप्य तं ननाम रघूत्तमः ॥ ३॥

रामाय वैष्णवं चापमैन्द्रं तूणीयुगं तथा।

ब्राह्मं चास्त्रं च खड्गं च प्रददौ कुम्भसम्भवः ॥ ४॥

ततः स गच्छन्काकुत्स्थः समागम्य जटायुषम्।

वैदेह्याः पालनायैनं श्रद्धधे पितृवल्लभम् ॥५॥

ततः पञ्चवटीं प्राप्य तत्र लक्ष्मणनिर्मिताम्।

पर्णशालामध्युवास सीतया सहितः सुखम् ॥६॥

तत्राभ्येत्यैकदा रामं वव्रे शूर्पणखाऽभिका।

तन्निरस्ता लक्ष्मणं च वव्रे सोऽपि निराकरोत् ॥७॥

राममेव ततो वव्रे कामार्ता कामसन्निभम्।

पुनश्च धिक्कृता तेन सीतामभ्यद्रवद्रुषा ॥ ८॥

लक्ष्मणेन तदा रोषात्कृत्तश्रवणनासिका।

सा तु गत्वा जनस्थानं खरायैतन्न्यवेदयत् ॥९॥

तदाकर्ण्य खरः क्रुद्धो राघवं हन्तुमाययौ।

दूषणत्रिशिरोमुख्यैर्यातुधानैः समन्वितः ॥ १०॥

तत्क्षणं लक्ष्मणे सीतां निधाय रघुनन्दनः ।

खरं सहानुगं सङ्ख्ये जघानालघुविक्रमः ॥ ११॥

ततः शूर्पणखा गत्वा लङ्कां शोकसमन्विता ।

न्यवेदयद्रावणाय वृत्तान्तं सर्वमादितः ॥ १२॥

तच्छ्रुत्वा रावणः सीतां हर्तुं कृतमतिस्तदा ।

मारीचस्याश्रमं प्राप्य साहाय्ये तमचोदयत् ॥१३॥

सोऽपि स्वर्णमृगो भूत्वा सीतायाः प्रमुखेऽचरत् ।

सा तु तं मृगमाहर्तुं भर्तारं समयाचत ॥ १४॥

नियुज्य लक्ष्मणं सीतां रक्षितुं रघुनन्दनः ।

अन्वगच्छन्मृगं तूर्णं द्रवन्तं काननान्तरे ॥ १५॥

विव्याध च मृगं रामः स निजं रूपमास्थितः ।

हा सीते लक्ष्मणेत्येवं रुदन्प्राणान्समत्यजत् ॥१६॥

एतदाकर्ण्य वैदेह्या लक्ष्मणश्चोदितो भृशम् ।

तद्रक्षां देवताः प्रार्थ्य प्रययौ राघवान्तिकम् ॥१७॥

तदन्तरे समासाद्य रावणो यतिरूपधृत् ।

सीतां गृहीत्वा प्रययौ गगनेन मुदाऽन्वितः ॥ १८॥

ततो जटायुरालोक्य नीयमानां तु जानकीम् ।

प्राहरद्रावणं प्राप्य तुण्डपक्षनखैर्भृशम् ॥१९॥

छित्त्वैनं चन्द्रहासेन पातयित्वा च भूतले ।

गृहीत्वा रावणः सीतां प्राविशन्निजमन्दिरम् ॥२०॥

अशोकवनिकामध्ये संस्थाप्य जनकात्मजाम् ।

रावणो रक्षितुं चैनां नियुयोज निशाचरीः ॥ २१॥

हत्वा रामस्तु मारीचमागच्छन्ननुजेरिताम् ।

वार्त्तामाकर्ण्य दुःखार्तः पर्णशालामुपागमत् ॥२२॥

अदृष्ट्वा तत्र वैदेहीं विचिन्वानो वनान्तरे ।

सहानुजो गृध्रराजं छिन्नपक्षं ददर्श सः ॥ २३॥

तेनोक्तां जानकीवार्त्तां श्रुत्वा पश्चान्मृतं च तम् ।

दग्ध्वा सहानुजो रामश्चक्रे तस्योदकक्रियाम् ॥२४॥

आत्मनोऽभिभवं पश्चात्कुर्वतीं पथि लक्ष्मणः ।

अयोमुखीं चकाराशु कृत्तश्रवणनासिकाम् ॥२५॥

गृहीतौ तौ कबन्धेन भुजौ तस्य न्यकृन्तताम् ।

ततस्तु याचितौ तेन तद्देहं देहतुश्च तौ ॥ २६॥

स तु दिव्याकृतिर्भूत्वा रामं सीतोपलब्धये ।

सुग्रीवमृष्यमूकस्थं याहीत्युक्त्वा दिवं ययौ ॥ २७॥

ततः प्रीतो रघुश्रेष्ठः शबर्याश्रममभ्ययात् ।

तयाऽभिपूजितः पश्चात्पम्पां प्राप सलक्ष्मणः ॥ २८॥

॥ इति श्रीरामोदन्ते आरण्यकाण्डः समाप्तः ॥

## ॥ अथ किष्किन्धाकाण्डः ॥

हनूमानथ सुग्रीवनिर्दिष्टो रामलक्ष्मणौ ।

प्राप्य ज्ञात्वा तु वृत्तान्तं तेन तौ समयोजयत् ॥१॥

ततो रामस्य वृत्तान्तं सुग्रीवाय निवेद्य सः ।

सख्यं च कारयामास तयोः पावकसन्निधौ ॥ २॥

प्रतिजज्ञे तदा रामो हनिष्यामीति वालिनम् ।

दर्शयिष्यामि वैदेहीमित्यन्येन च संश्रुतम् ॥३॥

सुग्रीवेणाथ रामाय भ्रातृवैरस्य कारणम् ।

निवेदितमशेषं च बलाधिक्यं च तस्य तत् ॥४॥

तत्क्षणं दुन्दुभेः कायं सुग्रीवेण प्रदर्शितम् ।

सुदूरं प्रेषयामास पादाङ्गुष्ठेन राघवः ॥ ५॥

पुनश्च दर्शितांस्तेन सालान्सप्त रघूत्तमः ।

बाणेनैकेन चिच्छेद सार्धं तस्यानुशङ्कया ॥ ६॥

किष्किन्धां प्राप्य सुग्रीवसतो रामसमन्वितः ।

जगर्जातीव संहृष्टः कोपयन् वानराधिपम् कोपयन् ॥७॥

वाली निष्क्रम्य सुग्रीवं समरेऽपीडयद्भृशम् ।

सोऽपि सम्भग्नसर्वाङ्गः प्राद्रवद्राघवान्तिकम् ॥८॥

कृतचिह्नस्तु रामेण पुनरेव स वालिनम् ।

रणायाह्वयत क्षिप्रं तस्थौ रामस्तिरोहितः ॥ ९॥

हेममाली ततो वाली तारयाऽभिहितं हितम् ।

निरस्य कुपितो भ्रात्रा रणं चक्रे सुदारुणम् ॥१०॥

बाणेन वालिनं रामो विद्ध्वा भूमौ न्यपातयत् ।

सोऽपि राम इति ज्ञात्वा त्यक्त्वा देहं दिवं ययौ ॥ ११॥

पश्चात्तपन्तं सुग्रीवं समाश्वास्य रघूत्तमः ।

वानराणामधिपतिं चकाराश्रितवत्सलः ॥ १२॥

ततो माल्यवतः पृष्ठे रामो लक्ष्मणसंयुतः ।

उवास चतुरो मासान्सीताविरहदुःखितः ॥ १३॥

अथ रामस्य निर्देशाल्लक्ष्मणो वानराधिपम् ।

आनयत्प्लवगैः सार्धं हनूमत्प्रमुखैर्गिरिम् ॥१४॥

सुग्रीवो राघवं दृष्ट्वा वचनात्तस्य वानरान् ।

न्ययुङ्क्त सीतामन्वेष्टुमाशासु चतसृष्वपि ॥ १५॥

ततो हनुमतः पाणौ ददौ रामोऽङ्गुलीयकम् ।

विश्वासाय तु वैदेह्यास्तद्गृहीत्वा स निर्ययौ ॥ १६॥

ततो हनूमत्प्रमुखाः वानरा दक्षिणां दिशम् ।

गत्वा सीतां विचिन्वन्तः पर्वतं विन्ध्यमाप्नुवन् ॥१७॥

समयातिक्रमात्तत्र चक्रुः प्रायोपवेशनम् ।

तेऽत्र सम्पातिना प्रोक्तां सीतावार्त्तां च शुश्रुवुः ॥ १८॥

ततः प्रापुरुदन्वन्तमङ्गदाद्याः प्लवङ्गमाः ।

तं विलङ्घयितुं तेषां न कश्चिदभवत्क्षमः ॥ १९॥

स्वप्रभावप्रशंसाभिस्तदा जाम्बवदुक्तिभिः ।

संवर्धितो महेन्द्राद्रिमारुरोहानिलात्मजः ॥ २०॥

॥ इति श्रीरामोदन्ते किष्किन्धाकाण्डः समाप्तः ॥

॥ अथ सुन्दरकाण्डः ॥

अभिवन्द्याथ सकलानमरान्पवनात्मजः ।

पुप्लुवे च गिरेस्तस्माद्विलङ्घयितुमर्णवम् ॥ १॥

स समुल्लङ्घ्य मैनाकं सुरसामभिवन्द्य च ।

निहत्य सिंहिकां नीत्या पारं प्राप महोदधेः ॥ २॥

लङ्काधिदेवतां जित्वा तां प्रविश्यानिलात्मजः ।

सीतां विचिन्वन्नद्राक्षीन्निद्राणं निशि रावणं ॥ ३॥

अपश्यंस्तत्र वैदेहीं विचिन्वानस्ततस्ततः ।

अशोकवनिकां गत्वा कां चिदार्तां ददर्श सः ॥ ४॥

पादपं कञ्चिदारुह्य तत्पलाशैः सुसंवृतः ।

आस्ते स्म मारुतिस्तत्र सीतेयमिति तर्कयन् ॥५॥

रावणस्तु तदाऽभ्येत्य मैथिलीं मदनार्दितः ।

भार्या भव ममेत्येवं बहुधा समयाचत ॥ ६॥

अहं त्वद्वशगा न स्यामित्येषा तं निराकरोत् ।

काममन्युपरीतात्मा रावणोऽपि तदा ययौ ॥ ७॥

निर्गते रावणे सीतां प्रलपन्तीं स मारुतिः ।

उक्त्वा रामस्य वृत्तान्तं प्रददौ चाङ्गुलीयकम् ॥८॥

तत्समादाय वैदेही विलप्य च भृशं पुनः ।

चूडामणिं ददौ तस्य करे जग्राह सोऽपि तम् ॥९॥

मा विषादं कृथा देवि राघवो रावणं रणे ।

हत्वा त्वां नेष्यतीत्येनामाश्वास्य स विनिर्ययौ ॥ १०॥

नीतिमान् सोऽपि सञ्चिन्त्य बभञ्जोपवनं च तत् ।

अक्षादीनि च रक्षांसि बहूनि समरेऽवधीत् ॥११॥

ततः शक्रजिता युद्धे बद्धः पवननन्दनः ।

प्रतापं रघुनाथस्य रावणाय न्यवेदयत् ॥१२॥

रक्षोदीपितलाङ्गूलः स तु लङ्कामशेषतः ।

दग्ध्वा सागरमुत्तीर्य वानरान्समुपागमत् ॥१३॥

स गत्वा वानरैः साकं राघवायात्मना कृतम् ।

निवेदयित्वा सकलं ददौ चूडामणिं च तम् ॥१४॥

॥ इति श्रीरामोदन्ते सुन्दरकाण्डः समाप्तः ॥

## ॥ अथ युद्धकाण्डः ॥

अथासङ्ख्यैः कपिगणैः सुग्रीवप्रमुखैः सह।

निर्ययौ राघवस्तूर्णं तीरं प्राप महोदधेः ॥ १॥

तदा विभीषणो भ्रात्रा त्यक्तो राममुपागमत्।

लङ्काधिपत्येऽभ्यषिञ्चदेनं रामोऽरिमर्दनः ॥ २॥

दत्तमार्गः समुद्रेण तत्र सेतुं नलेन सः।

कारयित्वा तेन गत्वा सुवेलं प्राप पर्वतम् ॥३॥

ततो राघवनिर्दिष्टा नीलमुख्याः प्लवङ्गमाः।

रुरुधुः सर्वतो लङ्कां वृक्षपाषाणपाणयः ॥ ४॥

रावणस्य नियोगेन निर्गतान्युधि राक्षसान्।

प्रहस्तप्रमुखान्हत्वा नेदुस्ते सिंहविक्रमाः ॥ ५॥

सुग्रीवश्च हनूमांश्च तथा राघवलक्ष्मणौ।

राक्षसान्सुबहून्युद्धे जघ्नुर्भीमपराक्रमाः ॥ ६॥

रावणिस्तु तदाऽभ्येत्य समरे रामलक्ष्मणौ।

ननाह नागपाशेन नागारिस्तौ व्यमोचयत् ॥७॥

रावणोऽपि ततो युद्धे राघवेण पराजितः ।

कुम्भकर्णं प्रबोध्याशु रामं हन्तुं न्ययुङ्क्त च ॥ ८॥

रक्षोभिस्सह निर्याय भक्षयन्तं प्लवङ्गमान् ।

सहानुगं कुम्भकर्णं जघानाशु स राघवः ॥ ९॥

इन्द्रजित्पुनरप्याजौ सानुजं च रघूत्तमम् ।

अमोहयद्वानरांश्च ब्रह्मास्त्रेणास्त्रकोविदः ॥ १०॥

तदैव गत्वा हनुमानानीयौषधिपर्वतम् ।

तान्सर्वान्बोधयित्वाऽऽशु तत्स्थानेऽस्थापयच्च तम् ॥११॥

ततो निकुम्भिलां गत्वा सौमित्रिः सविभीषणः ।

निषिद्ध्येन्द्रजितो होमं संयुगे तं जघान च ॥ १२॥

तच्छ्रुत्वा रावणः क्रुद्धो निर्याय शरवृष्टिभिः ।

प्लवङ्गमान्पीडयित्वा रामेण युयुधे भृशं ॥ १३॥

रामोऽपि सुचिरं तेन कृत्वा युद्धं सुदारुणम् ।

ब्रह्मास्त्रेण जघानैनं ब्रह्मदत्तवरं रिपुम् ॥१४॥

तदा शक्रादयो देवा हृष्टा रावणनिग्रहात् ।

रघूत्तमस्योत्तमाङ्गे पुष्पवृष्टिमकुर्वत ॥ १५॥

राक्षसानामधिपतिं कृत्वा रामो विभीषणम् ।

अग्निप्रवेशसंशुद्धां परिजग्राह मैथिलीम् ॥१६॥

पुरन्दरवरेणाशु जीवयित्वा प्लवङ्गमान् ।

अतोषयद्रघुश्रेष्ठो विविधैर्धनसञ्चयैः ॥ १७॥

ततः पुष्पकमारुह्य ससीतः सहलक्ष्मणः ।

निर्ययौ वानरैस्साकं रामो रक्षोऽधिपेन च ॥ १८॥

अयोध्यां प्रत्यसौ गच्छन्प्रेषयित्वानिलात्मजम् ।

भरतस्य मतं ज्ञात्वा नन्दिग्राममुपागमत् ॥१९॥

भ्रातृभिः सह सङ्गम्य वेषं सन्त्यज्य तापसम् ।

अयोध्यां प्राविशद्रामः प्रीतैर्बन्धुजनैस्सह ॥ २०॥

वसिष्ठोऽथ द्विजैस्साकं मन्त्रिसामन्तसन्निधौ ।

सीतया सहितं राममभ्यषिञ्चद्यथाविधि ॥ २१॥

आह्लादयञ्जगत्सर्वं पौर्णमास्यां शशी यथा।

अयोध्यामवसद्रामः सीतया सहितश्चिरम् ॥२२॥

ततो वानरसङ्घांश्च भक्षयन्तं निशाचरम्।

ऐन्द्रेणास्त्रेण रामोऽपि निजघान रणे भृशम् ॥९॥

ततो रावणसन्दिष्टौ देवान्तकनरान्तकौ।

हनूमदङ्गदाभ्यां तु निहतौ रणमूर्धनि ॥ १०॥

अथातिकायमायान्तं रथमारुह्य वाहिनीम्।

अर्दयन्तं महाकायं लक्ष्मणश्चावधीच्छरैः ॥ ११॥

ततो रावणसन्दिष्टः शक्रजिद्राघवौ रणे।

ब्रह्मास्त्रेण च तौ बद्ध्वा वानरांश्चावधीच्छरैः ॥ १२॥

अथ जाम्बवतो वाक्याद्गत्वा चौषधिपर्वतम्।

मारुतिश्चौषधीस्तत्राद‍ृष्ट्वा कोपं चकार सः ॥ १३॥

भूधरं तं समुत्पाट्य गृहीत्वा पुनरागतः।

तासां गन्धेन वै सर्वान्राघवादीनजीवयत् ॥१४॥

रावणः कपिभिर्दग्धां पुरीं वीक्ष्य रुषान्वितः ।

न्ययुङ्क्त कुम्भकर्णस्य पुत्रौ हन्तुं च राघवौ ॥ १५॥

अथार्दयन्तौ तत्सैन्यं वीक्ष्य तौ बलशालिनौ ।

कुम्भं रामोऽवधीद्बाणैर्निकुम्भं चात्मजो रवेः ॥ १६॥

ततः खरात्मजं तेन रावणेन प्रचोदितम् ।

पीडयन्तं कपीन्बाणैर्जघानास्त्रेण राघवः ॥ १७॥

ततः सन्तप्तहृदयो रावणो युद्धदुर्मदम् ।

प्रचोदयामास सुतं युद्धे हन्तुं स राघवौ ॥ १८॥

नगरान्निर्ययौ तूर्णमिन्द्रजित्समितिञ्जयः ।

मायासीतां विनिक्षिप्य सर्वेषां मोहनाय वै ॥ १९॥

वानरेष्वपि पश्यत्सु हनूमत्प्रमुखेषु च ।

जघान सीतां खड्गेन शितेन समितिञ्जयः ॥ २०॥

युद्धं त्यक्त्वा ततः सर्वैर्वानरैः स परीवृतः ।

दुःखितो हनुमांस्तत्र यत्र रमोऽव्रजल्लघु ॥ २१॥

उपगम्याब्रवीद्रामं हनूमान्निखिलं तदा ।

श्रुत्वा वृत्तान्तमखिलं रामो मोहमवाप सः ॥ २२॥

विभीषणोऽथ सम्प्राप्य दृष्ट्वा रामं च मूर्छितम् ।

विषण्णान्वानरान्वाचा सान्त्वयन्निदमब्रवीत् ॥२३॥

मिथ्या विषादं सन्त्यज्य जगन्नायक हे प्रभो ।

शृणु मेऽभिहितं वाक्यं ज्ञात्वा रावणिमानसम् ॥२४॥

दुरात्मना कृता माया राक्षसेन्द्रसुतेन वै ।

निकुम्भिलायां होमं तु कृतं तेनाधुना किल ॥ २५॥

लक्ष्मणं प्रेषयाद्यैव मया सह समन्त्रिणा ।

कृते होमे तत्र रिपुरजेयो भवति ध्रुवम् ॥ध्रुवम् २६॥

उवाच रामः सौमित्रिं राक्षसेन्द्रसुतं जहि ।

गच्छेति शीघ्रं सुहृदा रावणस्यानुजेन सः ॥ २७॥

लक्ष्मणस्तु तदा राममामन्त्र्य सविभीषणः ।

निकुम्भिलां प्राप तूर्णमिन्द्रजिद्यत्र वर्तते ॥ २८॥

अदर्शयद्भ्रातृपुत्रं धर्मात्मा स विभीषणः ।

लक्ष्मणो भेदयामास राक्षसाञ्छरसञ्चयैः ॥ २९॥

कृत्वा चिरं तत्र युद्धमैन्द्रेणास्त्रेण वै रुषा ।

शिरश्चिच्छेद सौमित्रिर्दशाननसुतस्य हि ॥ ३०॥

स सुतस्य वधं श्रुत्वा रावणः शोककर्शितः ।

नष्टधैर्यो विह्वलाङ्गो विललापाकुलेन्द्रियः ॥ ३१॥

निरर्थकं तु मज्जन्म जल्पितं च निरर्थकम् ।

येनाहमद्य पश्यामि हतमिन्द्रजितं रणे ॥ ३२॥

क्व गतोऽसि हतः शूर मानुषेण पदातिना ।

राज्याद्भ्रष्टेन दीनेन त्यक्त्वा मां पुत्र जीवितम् ॥३३॥

इन्द्रं जित्वा तु तं बद्ध्वा लङ्कामानीय वै बलात् ।

अकरोस्त्वं प्रतापेन कारागृहनिवासिनम् ॥३४॥

मोचयामास ब्रह्मा त्वां सान्त्वयित्वामराधिपम् ।

तादृक्त्वं कुत्र मां त्यक्त्वा गतोऽद्य सुदुरासदः ॥ ३५॥

किं करिष्याम्यहं पुत्र क्व गच्छामि वदाधुना ।

नय मां यत्र गन्तासि तत्र ते न विलम्बनम् ॥३६॥

लोकेषु त्वत्समो नास्ति तादृशस्य पितास्म्यहम् ।

इत्याशया स्थितं पुत्र गर्वितेन मयात्र हि ॥ ३७॥

धूम्राक्षो वज्रदंष्ट्रश्च कुम्भकर्णः प्रतापवान् ।

राक्षसा निहताः सर्वे प्रहस्तप्रमुखा अपि ॥ ३८॥

अनादृत्य तु तान्सर्वान्राक्षसान्प्रहतानपि ।

अवष्टभ्य बलं पुत्र सुखेनावस्थितं तव ॥ ३९॥

इत्येवं बहुधा तत्र विलप्य स तु रावणः ।

अन्तर्नियम्य दुःखानि कोपं चक्रे सुदारुणम् ॥४०॥

रथं सूत ममाग्रे त्वं क्षिप्रं कुरु जयैषिणः ।

रामं सलक्ष्मणं हन्तुं निर्गमिष्याम्यहं गृहात् ॥४१॥

इत्युक्त्वा रथमारुह्य शीघ्रं सारथिवाहितम् ।

रामेण सह सङ्गम्य युद्धं चक्रे सुदारुणम् ॥४२॥

ततो मातलिनानीतं रथमैन्द्रं समारुहन् ।

रराज रामो धर्मात्मा ह्युदयस्थो यथा रविः ॥ ४३॥

चकार युद्धम् युद्धम्तुमुलं देववृन्दे च पश्यति ।

सीताहरणजात्कोपाद्रामो धर्मभृतां वरः ॥ ४४॥

अथागस्त्यस्य वचनाद्रावणं लोककण्टकम् ।

जघान रामो लक्ष्मीवान्ब्राह्मेणास्त्रेण तं रणे ॥ ४५॥

मन्दोदरी वधं श्रुत्वा भर्तुः प्रियतरस्य सा ।

विललाप रणं गत्वा कुररीव भृशातुरा ॥ ४६॥

विभीषणोऽथ रामेण सन्दिष्टः सह राक्षसैः ।

चकार दहनं तस्य रावणस्य गतायुषः ॥ ४७॥

अथाग्निवचनात्सीतां रामो वीक्ष्य सुनिर्मलाम् ।

सन्दिष्टो देववृन्दैश्च जग्राह पितृसन्निधौ ॥ ४८॥

तवैव युक्तं कर्मैतत्सर्वलोकभयङ्करम् ।

तद्वैदेह्याः कृते राम सा तु लक्ष्मीर्भवान्स्वभूः ॥ ४९॥

इत्येवं देवसङ्घैश्च मुनिभिश्चाभिपूजितः ।

लक्ष्मणश्च तुतोषाथ रामो विश्वासमाययौ ॥ ५०॥

विभीषणस्य धर्मात्मा सत्यसन्ध उदारधीः ।

कारयामास लक्ष्मीवाननुजेनाभिषेचनम् ॥५१॥

ततः पुष्पकमारुह्य सह मित्रैर्जगत्पतिः ।

भार्यानुजाभ्यां सहितः किष्किन्धां प्राप राघवः ॥ ५२॥

किष्किन्धानिलयाः सर्वाः कपीनां योषितः प्रियाः ।

सीताकुतूहलात्पुष्पं विमानं ताः समारुहन् ॥५३॥

अथ दाशरथिः श्रीमान्भरतं द्रष्टुमिच्छया ।

भरद्वाजाश्रमं प्राप्तस्तत्र तेन निवारितः ॥ ५४॥

भरतस्यान्तिकं रामः प्रेषयामास मारुतिम् ।

रामस्यादर्शनाद्वह्निप्रवेशं काङ्क्षतो भृशं ॥ ५५॥

तत्र तेन मुनीन्द्रेण सानुजः ससुहृद्गणः ।

सन्तोषविवशेनाथ रामोऽपि विधिपूजितः ॥ ५६॥

रामोऽथ सह सङ्गम्य भरतेनारिघातिना ।

अयोध्यां प्राविशत्तूर्णं मातृभिश्चाभिनन्दितः ॥ ५७॥

अथायोध्यानिवासास्ते जनाः सर्वेऽपि तोषिताः ।

अभिगम्याब्रुवन्रामं धन्या वयमिति द्रुतम् ॥द्रुतम् ५८॥

चातकास्तु घनान्दृष्ट्वा मयूराश्च यथा शिशून् ।

आसाद्य मातरस्तोषं तथा प्रापुर्जना भुवि ॥ ५९॥

अथाभिषेकं रामस्य वसिष्ठाद्या मुदाऽन्विताः ।

सहिता मन्त्रिभिश्चक्रुर्वसवो वासवं यथा ॥ ६०॥

अभिषेकोत्सवे सर्वे सुग्रीवाद्याः कपीश्वराः ।

यथार्हं पूजिताश्चासन् स्रग्गन्धाम्बरभूषणैः ॥ ६१॥

विशिष्य मुक्ताहारेण सीतया हनुमान्मुदम् ।

पूजितश्च तथा लेभे यथा सीतावलोकने ॥ ६२॥

सर्वासां वानरीणां च कौसल्या पुत्रवत्सला ।

भूषणैर्भूषयामास वस्त्रचन्दनकुङ्कुमैः ॥ ६३॥

रामाज्ञयाथ सर्वेऽपि सुग्रीवादिप्लवङ्गमाः ।

किष्किन्धां लेभिरे कृच्छ्राच्छ्रीरामविरहातुराः ॥ ६४॥

अतिभक्तो दीर्घजीवी लङ्कासमरसाधकः ।

अनुज्ञातः स रामेण लङ्कां प्रायाद्विभीषणः ॥ ६५॥

पितुस्सिंहासनं प्राप्य भ्रातृभिः सहितोऽनघः ।

विरराज तथा रामो यथा विष्णुस्त्रिविष्टपे ॥ ६६॥

लक्ष्मणानुमते रामो यौवराज्यं तु दत्तवान् ।

भरतायाप्रमेयाय प्राणात्प्रियतराय सः ॥ ६७॥

चत्वारस्ते महात्मानः सभार्या रघुसत्तमाः ।

खे सतारो यथा चन्द्रस्तथा रेजुः स्वपत्तने ॥ ६८॥

॥ इति श्रीरामोदन्ते युद्धकाण्डः समाप्तः ॥

## ॥ अथ उत्तरकाण्डः ॥

राजा पर्यग्रहीदेव भार्यां रावणदूषिताम् ।

इत्यज्ञजनवादेन रामस्तत्याज मैथिलीम् ॥१॥

तद्विदित्वाथ वाल्मीकिरानीयैनां निजाश्रमम् ।

अन्तर्वर्त्नीं समाश्वास्य तत्रैवावासयत्सुखम् ॥२॥

ऋषिभिः प्रार्थितस्याथ राघवस्य नियोगतः ।

शत्रुघ्नो लवणं युद्धे निहत्यैनानपालयत् ॥३॥

तपस्यन्तं ततः शूद्रं शम्बूकाख्यं रघूत्तमः ।

हत्वा विप्रस्य कस्यापि मृतं पुत्रमजीवयत् ॥४॥

रामे हेममयीं पत्नीं कृत्वा यज्ञं वितन्वति ।

आनीय ससुतां सीतां तस्मै प्राचेतसो ददौ ॥ ५॥

शङ्क्यमाना पुनश्चैवं रामेण जनकात्मजा ।

भूम्या प्रार्थितया दत्तं विवरं प्रविवेश सा ॥ ६॥

लक्ष्मणः सभयभ्रंशाद्रामेण समुपेक्षितः ।

मानुषं देहमुत्सृज्य स्वकं रूपं समाविशत् ॥७॥

अथ रामस्य निर्देशात्पौरैः सह वनौकसः ।

निमज्ज्य सरयूतीर्थे देहं त्यक्त्वा दिवं ययुः ॥ ८॥

ततो भरतशत्रुघ्नौ निजं रूपमवापतुः ।

रामोऽपि मानुषं देहं त्यक्त्वा धामाविशत्स्वकम् ॥९॥

श्रीरामोदन्तमाख्यातमिदं मन्दधिया मया ।

समीक्ष्य निपुणैस्सद्भिः संशोध्य परिगृह्यताम् ॥१०॥

येषां प्रसादाद्रामस्य चरितं कीर्तितं मया ।

तान्गुरून्सर्वदा नौमि नारायणपरायणान् ॥११॥

यस्तु दाशरथिर्भूत्वा रणे हत्वा च रावणम् ।

ररक्ष लोकान्वैकुण्ठः स मां रक्षतु चिन्मयः ॥ १२॥

॥ इति श्रीरामोदन्ते उत्तरकाण्डः समाप्तः ॥